4.001.01a त्वां ह्यग्ने सदमित्समन्यवो देवासो देवमरतिं न्येरिर इति क्रत्वा न्येरिरे ।

4.001.01c अमर्त्यं यजत मर्त्येष्वा देवमादेवं जनत प्रचेतसं विश्वमादेवं जनत प्रचेतसम् ॥

4.001.02a स भ्रातरं वरुणमग्न आ ववृत्स्व देवाँ अच्छा सुमती यज्ञवनसं ज्येष्ठं यज्ञवनसम् ।

4.001.02c ऋतावानमादित्यं चर्षणीधृतं राजानं चर्षणीधृतम् ॥

4.001.03a सखे सखायमभ्या ववृत्स्वाशुं न चक्रं रथ्येव रंह्यास्मभ्यं दस्म रंह्या ।

4.001.03c अग्ने मृळीकं वरुणे सचा विदो मरुत्सु विश्वभानुषु ।

4.001.03d तोकाय तुजे शुशुचान शं कृध्यस्मभ्यं दस्म शं कृधि ॥

4.001.04a त्वं नो अग्ने वरुणस्य विद्वान्देवस्य हेळोऽव यासिसीष्ठाः ।

4.001.04c यजिष्ठो वह्नितमः शोशुचानो विश्वा द्वेषांसि प्र मुमुग्ध्यस्मत् ॥

4.001.05a स त्वं नो अग्नेऽवमो भवोती नेदिष्ठो अस्या उषसो व्युष्टौ ।

4.001.05c अव यक्ष्व नो वरुणं रराणो वीहि मृळीकं सुहवो न एधि ॥

4.001.06a अस्य श्रेष्ठा सुभगस्य संदृग्देवस्य चित्रतमा मर्त्येषु ।

4.001.06c शुचि घृतं न तप्तमघ्न्याया स्पार्हा देवस्य मंहनेव धेनोः ॥

4.001.07a त्रिरस्य ता परमा सन्ति सत्या स्पार्हा देवस्य जनिमान्यग्नेः ।

4.001.07c अनन्ते अन्तः परिवीत आगाच्छुचिः शुक्रो अर्यो रोरुचानः ॥

4.001.08a स दूतो विश्वेदभि वष्टि सद्मा होता हिरण्यरथो रंसुजिह्वः ।

4.001.08c रोहिदश्वो वपुष्यो विभावा सदा रण्वः पितुमतीव संसत् ॥

4.001.09a स चेतयन्मनुषो यज्ञबन्धुः प्र तं मह्या रशनया नयन्ति ।

4.001.09c स क्षेत्यस्य दुर्यासु साधन्देवो मर्तस्य सधनित्वमाप ॥

4.001.10a स तू नो अग्निर्नयतु प्रजानन्नच्छा रत्नं देवभक्तं यदस्य ।

4.001.10c धिया यद्विश्वे अमृता अकृण्वन्द्यौष्पिता जनिता सत्यमुक्षन् ॥

4.001.11a स जायत प्रथमः पस्त्यासु महो बुध्ने रजसो अस्य योनौ ।

4.001.11b अपादशीर्षा गुहमानो अन्तायोयुवानो वृषभस्य नीळे ॥

4.001.12a प्र शर्ध आर्त प्रथमं विपन्याँ ऋतस्य योना वृषभस्य नीळे ।

4.001.12c स्पार्हो युवा वपुष्यो विभावा सप्त प्रियासोऽजनयन्त वृष्णे ॥

4.001.13a अस्माकमत्र पितरो मनुष्या अभि प्र सेदुर्ऋतमाशुषाणाः ।

4.001.13c अश्मव्रजाः सुदुघा वव्रे अन्तरुदुस्रा आजन्नुषसो हुवानाः ॥

4.001.14a ते मर्मृजत ददृवांसो अद्रिं तदेषामन्ये अभितो वि वोचन् ।

4.001.14c पश्वयन्त्रासो अभि कारमर्चन्विदन्त ज्योतिश्चकृपन्त धीभिः ॥

4.001.15a ते गव्यता मनसा दृध्रमुब्धं गा येमानं परि षन्तमद्रिम् ।

4.001.15c दृळ्हं नरो वचसा दैव्येन व्रजं गोमन्तमुशिजो वि वव्रुः ॥

4.001.16a ते मन्वत प्रथमं नाम धेनोस्त्रिः सप्त मातुः परमाणि विन्दन् ।

4.001.16c तज्जानतीरभ्यनूषत व्रा आविर्भुवदरुणीर्यशसा गोः ॥

4.001.17a नेशत्तमो दुधितं रोचत द्यौरुद्देव्या उषसो भानुरर्त ।

4.001.17c आ सूर्यो बृहतस्तिष्ठदज्राँ ऋजु मर्तेषु वृजिना च पश्यन् ॥

4.001.18a आदित्पश्चा बुबुधाना व्यख्यन्नादिद्रत्नं धारयन्त द्युभक्तम् ।

4.001.18c विश्वे विश्वासु दुर्यासु देवा मित्र धिये वरुण सत्यमस्तु ॥

4.001.19a अच्छा वोचेय शुशुचानमग्निं होतारं विश्वभरसं यजिष्ठम् ।

4.001.19c शुच्यूधो अतृणन्न गवामन्धो न पूतं परिषिक्तमंशोः ॥

4.001.20a विश्वेषामदितिर्यज्ञियानां विश्वेषामतिथिर्मानुषाणाम् ।

4.001.20c अग्निर्देवानामव आवृणानः सुमृळीको भवतु जातवेदाः ॥

4.002.01a यो मर्त्येष्वमृत ऋतावा देवो देवेष्वरतिर्निधायि ।

4.002.01c होता यजिष्ठो मह्ना शुचध्यै हव्यैरग्निर्मनुष ईरयध्यै ॥

4.002.02a इह त्वं सूनो सहसो नो अद्य जातो जाताँ उभयाँ अन्तरग्ने ।

4.002.02c दूत ईयसे युयुजान ऋष्व ऋजुमुष्कान्वृषणः शुक्राँश्च ॥

4.002.03a अत्या वृधस्नू रोहिता घृतस्नू ऋतस्य मन्ये मनसा जविष्ठा ।

4.002.03c अन्तरीयसे अरुषा युजानो युष्माँश्च देवान्विश आ च मर्तान् ॥

4.002.04a अर्यमणं वरुणं मित्रमेषामिन्द्राविष्णू मरुतो अश्विनोत ।

4.002.04c स्वश्वो अग्ने सुरथः सुराधा एदु वह सुहविषे जनाय ॥

4.002.05a गोमाँ अग्नेऽविमाँ अश्वी यज्ञो नृवत्सखा सदमिदप्रमृष्यः ।

4.002.05c इळावाँ एषो असुर प्रजावान्दीर्घो रयिः पृथुबुध्नः सभावान् ॥

4.002.06a यस्त इध्मं जभरत्सिष्विदानो मूर्धानं वा ततपते त्वाया ।

4.002.06c भुवस्तस्य स्वतवाँः पायुरग्ने विश्वस्मात्सीमघायत उरुष्य ॥

4.002.07a यस्ते भरादन्नियते चिदन्नं निशिषन्मन्द्रमतिथिमुदीरत् ।

4.002.07c आ देवयुरिनधते दुरोणे तस्मिन्रयिर्ध्रुवो अस्तु दास्वान् ॥

4.002.08a यस्त्वा दोषा य उषसि प्रशंसात्प्रियं वा त्वा कृणवते हविष्मान् ।

4.002.08c अश्वो न स्वे दम आ हेम्यावान्तमंहसः पीपरो दाश्वांसम् ॥

4.002.09a यस्तुभ्यमग्ने अमृताय दाशद्दुवस्त्वे कृणवते यतस्रुक् ।

4.002.09c न स राया शशमानो वि योषन्नैनमंहः परि वरदघायोः ॥

4.002.10a यस्य त्वमग्ने अध्वरं जुजोषो देवो मर्तस्य सुधितं रराणः ।

4.002.10c प्रीतेदसद्धोत्रा सा यविष्ठासाम यस्य विधतो वृधासः ॥

4.002.11a चित्तिमचित्तिं चिनवद्वि विद्वान्पृष्ठेव वीता वृजिना च मर्तान् ।

4.002.11c राये च नः स्वपत्याय देव दितिं च रास्वादितिमुरुष्य ॥

4.002.12a कविं शशासुः कवयोऽदब्धा निधारयन्तो दुर्यास्वायोः ।

4.002.12c अतस्त्वं दृश्याँ अग्न एतान्पड्भिः पश्येरद्भुताँ अर्य एवैः ॥

4.002.13a त्वमग्ने वाघते सुप्रणीतिः सुतसोमाय विधते यविष्ठ ।

4.002.13c रत्नं भर शशमानाय घृष्वे पृथु श्चन्द्रमवसे चर्षणिप्राः ॥

4.002.14a अधा ह यद्वयमग्ने त्वाया पड्भिर्हस्तेभिश्चकृमा तनूभिः ।

4.002.14c रथं न क्रन्तो अपसा भुरिजोरृतं येमुः सुध्य आशुषाणाः ॥

4.002.15a अधा मातुरुषसः सप्त विप्रा जायेमहि प्रथमा वेधसो नॄन् ।

4.002.15c दिवस्पुत्रा अङ्गिरसो भवेमाद्रिं रुजेम धनिनं शुचन्तः ॥

4.002.16a अधा यथा नः पितरः परासः प्रत्नासो अग्न ऋतमाशुषाणाः ।

4.002.16c शुचीदयन्दीधितिमुक्थशासः क्षामा भिन्दन्तो अरुणीरप व्रन् ॥

4.002.17a सुकर्माणः सुरुचो देवयन्तोऽयो न देवा जनिमा धमन्तः ।

4.002.17c शुचन्तो अग्निं ववृधन्त इन्द्रमूर्वं गव्यं परिषदन्तो अग्मन् ॥

4.002.18a आ यूथेव क्षुमति पश्वो अख्यद्देवानां यज्जनिमान्त्युग्र ।

4.002.18c मर्तानां चिदुर्वशीरकृप्रन्वृधे चिदर्य उपरस्यायोः ॥

4.002.19a अकर्म ते स्वपसो अभूम ऋतमवस्रन्नुषसो विभातीः ।

4.002.19c अनूनमग्निं पुरुधा सुश्चन्द्रं देवस्य मर्मृजतश्चारु चक्षुः ॥

4.002.20a एता ते अग्न उचथानि वेधोऽवोचाम कवये ता जुषस्व ।

4.002.20c उच्छोचस्व कृणुहि वस्यसो नो महो रायः पुरुवार प्र यन्धि ॥

4.003.01a आ वो राजानमध्वरस्य रुद्रं होतारं सत्ययजं रोदस्योः ।

4.003.01c अग्निं पुरा तनयित्नोरचित्ताद्धिरण्यरूपमवसे कृणुध्वम् ॥

4.003.02a अयं योनिश्चकृमा यं वयं ते जायेव पत्य उशती सुवासाः ।

4.003.02c अर्वाचीनः परिवीतो नि षीदेमा उ ते स्वपाक प्रतीचीः ॥

4.003.03a आशृण्वते अदृपिताय मन्म नृचक्षसे सुमृळीकाय वेधः ।

4.003.03c देवाय शस्तिममृताय शंस ग्रावेव सोता मधुषुद्यमीळे ॥

4.003.04a त्वं चिन्नः शम्या अग्ने अस्या ऋतस्य बोध्यृतचित्स्वाधीः ।

4.003.04c कदा त उक्था सधमाद्यानि कदा भवन्ति सख्या गृहे ते ॥

4.003.05a कथा ह तद्वरुणाय त्वमग्ने कथा दिवे गर्हसे कन्न आगः ।

4.003.05c कथा मित्राय मीळ्हुषे पृथिव्यै ब्रवः कदर्यम्णे कद्भगाय ॥

4.003.06a कद्धिष्ण्यासु वृधसानो अग्ने कद्वाताय प्रतवसे शुभंये ।

4.003.06c परिज्मने नासत्याय क्षे ब्रवः कदग्ने रुद्राय नृघ्ने ॥

4.003.07a कथा महे पुष्टिम्भराय पूष्णे कद्रुद्राय सुमखाय हविर्दे ।

4.003.07c कद्विष्णव उरुगायाय रेतो ब्रवः कदग्ने शरवे बृहत्यै ॥

4.003.08a कथा शर्धाय मरुतामृताय कथा सूरे बृहते पृच्छ्यमानः ।

4.003.08c प्रति ब्रवोऽदितये तुराय साधा दिवो जातवेदश्चिकित्वान् ॥

4.003.09a ऋतेन ऋतं नियतमीळ आ गोरामा सचा मधुमत्पक्वमग्ने ।

4.003.09c कृष्णा सती रुशता धासिनैषा जामर्येण पयसा पीपाय ॥

4.003.10a ऋतेन हि ष्मा वृषभश्चिदक्तः पुमाँ अग्निः पयसा पृष्ठ्येन ।

4.003.10c अस्पन्दमानो अचरद्वयोधा वृषा शुक्रं दुदुहे पृश्निरूधः ॥

4.003.11a ऋतेनाद्रिं व्यसन्भिदन्तः समङ्गिरसो नवन्त गोभिः ।

4.003.11c शुनं नरः परि षदन्नुषासमाविः स्वरभवज्जाते अग्नौ ॥

4.003.12a ऋतेन देवीरमृता अमृक्ता अर्णोभिरापो मधुमद्भिरग्ने ।

4.003.12c वाजी न सर्गेषु प्रस्तुभानः प्र सदमित्स्रवितवे दधन्युः ॥

4.003.13a मा कस्य यक्षं सदमिद्धुरो गा मा वेशस्य प्रमिनतो मापेः ।

4.003.13c मा भ्रातुरग्ने अनृजोर्ऋणं वेर्मा सख्युर्दक्षं रिपोर्भुजेम ॥

4.003.14a रक्षा णो अग्ने तव रक्षणेभी रारक्षाणः सुमख प्रीणानः ।

4.003.14c प्रति ष्फुर वि रुज वीड्वंहो जहि रक्षो महि चिद्वावृधानम् ॥

4.003.15a एभिर्भव सुमना अग्ने अर्कैरिमान्स्पृश मन्मभिः शूर वाजान् ।

4.003.15c उत ब्रह्माण्यङ्गिरो जुषस्व सं ते शस्तिर्देववाता जरेत ॥

4.003.16a एता विश्वा विदुषे तुभ्यं वेधो नीथान्यग्ने निण्या वचांसि ।

4.003.16c निवचना कवये काव्यान्यशंसिषं मतिभिर्विप्र उक्थैः ॥

4.004.01a कृणुष्व पाजः प्रसितिं न पृथ्वीं याहि राजेवामवाँ इभेन ।

4.004.01c तृष्वीमनु प्रसितिं द्रूणानोऽस्तासि विध्य रक्षसस्तपिष्ठैः ॥

4.004.02a तव भ्रमास आशुया पतन्त्यनु स्पृश धृषता शोशुचानः ।

4.004.02c तपूंष्यग्ने जुह्वा पतंगानसंदितो वि सृज विष्वगुल्काः ॥

4.004.03a प्रति स्पशो वि सृज तूर्णितमो भवा पायुर्विशो अस्या अदब्धः ।

4.004.03c यो नो दूरे अघशंसो यो अन्त्यग्ने माकिष्टे व्यथिरा दधर्षीत् ॥

4.004.04a उदग्ने तिष्ठ प्रत्या तनुष्व न्य१मित्राँ ओषतात्तिग्महेते ।

4.004.04c यो नो अरातिं समिधान चक्रे नीचा तं धक्ष्यतसं न शुष्कम् ॥

4.004.05a ऊर्ध्वो भव प्रति विध्याध्यस्मदाविष्कृणुष्व दैव्यान्यग्ने ।

4.004.05c अव स्थिरा तनुहि यातुजूनां जामिमजामिं प्र मृणीहि शत्रून् ॥

4.004.06a स ते जानाति सुमतिं यविष्ठ य ईवते ब्रह्मणे गातुमैरत् ।

4.004.06c विश्वान्यस्मै सुदिनानि रायो द्युम्नान्यर्यो वि दुरो अभि द्यौत् ॥

4.004.07a सेदग्ने अस्तु सुभगः सुदानुर्यस्त्वा नित्येन हविषा य उक्थैः ।

4.004.07c पिप्रीषति स्व आयुषि दुरोणे विश्वेदस्मै सुदिना सासदिष्टिः ॥

4.004.08a अर्चामि ते सुमतिं घोष्यर्वाक्सं ते वावाता जरतामियं गीः ।

4.004.08c स्वश्वास्त्वा सुरथा मर्जयेमास्मे क्षत्राणि धारयेरनु द्यून् ॥

4.004.09a इह त्वा भूर्या चरेदुप त्मन्दोषावस्तर्दीदिवांसमनु द्यून् ।

4.004.09c क्रीळन्तस्त्वा सुमनसः सपेमाभि द्युम्ना तस्थिवांसो जनानाम् ॥

4.004.10a यस्त्वा स्वश्वः सुहिरण्यो अग्न उपयाति वसुमता रथेन ।

4.004.10c तस्य त्राता भवसि तस्य सखा यस्त आतिथ्यमानुषग्जुजोषत् ॥

4.004.11a महो रुजामि बन्धुता वचोभिस्तन्मा पितुर्गोतमादन्वियाय ।

4.004.11c त्वं नो अस्य वचसश्चिकिद्धि होतर्यविष्ठ सुक्रतो दमूनाः ॥

4.004.12a अस्वप्नजस्तरणयः सुशेवा अतन्द्रासोऽवृका अश्रमिष्ठाः ।

4.004.12c ते पायवः सध्र्यञ्चो निषद्याग्ने तव नः पान्त्वमूर ॥

4.004.13a ये पायवो मामतेयं ते अग्ने पश्यन्तो अन्धं दुरितादरक्षन् ।

4.004.13c ररक्ष तान्सुकृतो विश्ववेदा दिप्सन्त इद्रिपवो नाह देभुः ॥

4.004.14a त्वया वयं सधन्य१स्त्वोतास्तव प्रणीत्यश्याम वाजान् ।

4.004.14c उभा शंसा सूदय सत्यतातेऽनुष्ठुया कृणुह्यह्रयाण ॥

4.004.15a अया ते अग्ने समिधा विधेम प्रति स्तोमं शस्यमानं गृभाय ।

4.004.15c दहाशसो रक्षसः पाह्य१स्मान्द्रुहो निदो मित्रमहो अवद्यात् ॥

4.005.01a वैश्वानराय मीळ्हुषे सजोषाः कथा दाशेमाग्नये बृहद्भाः ।

4.005.01c अनूनेन बृहता वक्षथेनोप स्तभायदुपमिन्न रोधः ॥

4.005.02a मा निन्दत य इमां मह्यं रातिं देवो ददौ मर्त्याय स्वधावान् ।

4.005.02c पाकाय गृत्सो अमृतो विचेता वैश्वानरो नृतमो यह्वो अग्निः ॥

4.005.03a साम द्विबर्हा महि तिग्मभृष्टिः सहस्ररेता वृषभस्तुविष्मान् ।

4.005.03c पदं न गोरपगूळ्हं विविद्वानग्निर्मह्यं प्रेदु वोचन्मनीषाम् ॥

4.005.04a प्र ताँ अग्निर्बभसत्तिग्मजम्भस्तपिष्ठेन शोचिषा यः सुराधाः ।

4.005.04c प्र ये मिनन्ति वरुणस्य धाम प्रिया मित्रस्य चेततो ध्रुवाणि ॥

4.005.05a अभ्रातरो न योषणो व्यन्तः पतिरिपो न जनयो दुरेवाः ।

4.005.05c पापासः सन्तो अनृता असत्या इदं पदमजनता गभीरम् ॥

4.005.06a इदं मे अग्ने कियते पावकामिनते गुरुं भारं न मन्म ।

4.005.06c बृहद्दधाथ धृषता गभीरं यह्वं पृष्ठं प्रयसा सप्तधातु ॥

4.005.07a तमिन्न्वे३व समना समानमभि क्रत्वा पुनती धीतिरश्याः ।

4.005.07c ससस्य चर्मन्नधि चारु पृश्नेरग्रे रुप आरुपितं जबारु ॥

4.005.08a प्रवाच्यं वचसः किं मे अस्य गुहा हितमुप निणिग्वदन्ति ।

4.005.08c यदुस्रियाणामप वारिव व्रन्पाति प्रियं रुपो अग्रं पदं वेः ॥

4.005.09a इदमु त्यन्महि महामनीकं यदुस्रिया सचत पूर्व्यं गौः ।

4.005.09c ऋतस्य पदे अधि दीद्यानं गुहा रघुष्यद्रघुयद्विवेद ॥

4.005.10a अध द्युतानः पित्रोः सचासामनुत गुह्यं चारु पृश्नेः ।

4.005.10c मातुष्पदे परमे अन्ति षद्गोर्वृष्णः शोचिषः प्रयतस्य जिह्वा ॥

4.005.11a ऋतं वोचे नमसा पृच्छ्यमानस्तवाशसा जातवेदो यदीदम् ।

4.005.11c त्वमस्य क्षयसि यद्ध विश्वं दिवि यदु द्रविणं यत्पृथिव्याम् ॥

4.005.12a किं नो अस्य द्रविणं कद्ध रत्नं वि नो वोचो जातवेदश्चिकित्वान् ।

4.005.12c गुहाध्वनः परमं यन्नो अस्य रेकु पदं न निदाना अगन्म ॥

4.005.13a का मर्यादा वयुना कद्ध वाममच्छा गमेम रघवो न वाजम् ।

4.005.13c कदा नो देवीरमृतस्य पत्नीः सूरो वर्णेन ततनन्नुषासः ॥

4.005.14a अनिरेण वचसा फल्ग्वेन प्रतीत्येन कृधुनातृपासः ।

4.005.14c अधा ते अग्ने किमिहा वदन्त्यनायुधास आसता सचन्ताम् ॥

4.005.15a अस्य श्रिये समिधानस्य वृष्णो वसोरनीकं दम आ रुरोच ।

4.005.15c रुशद्वसानः सुदृशीकरूपः क्षितिर्न राया पुरुवारो अद्यौत् ॥

4.006.01a ऊर्ध्व ऊ षु णो अध्वरस्य होतरग्ने तिष्ठ देवताता यजीयान् ।

4.006.01c त्वं हि विश्वमभ्यसि मन्म प्र वेधसश्चित्तिरसि मनीषाम् ॥

4.006.02a अमूरो होता न्यसादि विक्ष्वग्निर्मन्द्रो विदथेषु प्रचेताः ।

4.006.02c ऊर्ध्वं भानुं सवितेवाश्रेन्मेतेव धूमं स्तभायदुप द्याम् ॥

4.006.03a यता सुजूर्णी रातिनी घृताची प्रदक्षिणिद्देवतातिमुराणः ।

4.006.03c उदु स्वरुर्नवजा नाक्रः पश्वो अनक्ति सुधितः सुमेकः ॥

4.006.04a स्तीर्णे बर्हिषि समिधाने अग्ना ऊर्ध्वो अध्वर्युर्जुजुषाणो अस्थात् ।

4.006.04c पर्यग्निः पशुपा न होता त्रिविष्ट्येति प्रदिव उराणः ॥

4.006.05a परि त्मना मितद्रुरेति होताग्निर्मन्द्रो मधुवचा ऋतावा ।

4.006.05c द्रवन्त्यस्य वाजिनो न शोका भयन्ते विश्वा भुवना यदभ्राट् ॥

4.006.06a भद्रा ते अग्ने स्वनीक संदृग्घोरस्य सतो विषुणस्य चारुः ।

4.006.06c न यत्ते शोचिस्तमसा वरन्त न ध्वस्मानस्तन्वी३ रेप आ धुः ॥

4.006.07a न यस्य सातुर्जनितोरवारि न मातरापितरा नू चिदिष्टौ ।

4.006.07c अधा मित्रो न सुधितः पावको३ऽग्निर्दीदाय मानुषीषु विक्षु ॥

4.006.08a द्विर्यं पञ्च जीजनन्संवसानाः स्वसारो अग्निं मानुषीषु विक्षु ।

4.006.08c उषर्बुधमथर्यो३ न दन्तं शुक्रं स्वासं परशुं न तिग्मम् ॥

4.006.09a तव त्ये अग्ने हरितो घृतस्ना रोहितास ऋज्वञ्चः स्वञ्चः ।

4.006.09c अरुषासो वृषण ऋजुमुष्का आ देवतातिमह्वन्त दस्माः ॥

4.006.10a ये ह त्ये ते सहमाना अयासस्त्वेषासो अग्ने अर्चयश्चरन्ति ।

4.006.10c श्येनासो न दुवसनासो अर्थं तुविष्वणसो मारुतं न शर्धः ॥

4.006.11a अकारि ब्रह्म समिधान तुभ्यं शंसात्युक्थं यजते व्यू धाः ।

4.006.11c होतारमग्निं मनुषो नि षेदुर्नमस्यन्त उशिजः शंसमायोः ॥

4.007.01a अयमिह प्रथमो धायि धातृभिर्होता यजिष्ठो अध्वरेष्वीड्यः ।

4.007.01c यमप्नवानो भृगवो विरुरुचुर्वनेषु चित्रं विभ्वं विशेविशे ॥

4.007.02a अग्ने कदा त आनुषग्भुवद्देवस्य चेतनम् ।

4.007.02c अधा हि त्वा जगृभ्रिरे मर्तासो विद्वीड्यम् ॥

4.007.03a ऋतावानं विचेतसं पश्यन्तो द्यामिव स्तृभिः ।

4.007.03c विश्वेषामध्वराणां हस्कर्तारं दमेदमे ॥

4.007.04a आशुं दूतं विवस्वतो विश्वा यश्चर्षणीरभि ।

4.007.04c आ जभ्रुः केतुमायवो भृगवाणं विशेविशे ॥

4.007.05a तमीं होतारमानुषक्किकित्वांसं नि षेदिरे ।

4.007.05c रण्वं पावकशोचिषं यजिष्ठं सप्त धामभिः ॥

4.007.06a तं शश्वतीषु मातृषु वन आ वीतमश्रितम् ।

4.007.06c चित्रं सन्तं गुहा हितं सुवेदं कूचिदर्थिनम् ॥

4.007.07a ससस्य यद्वियुता सस्मिन्नूधन्नृतस्य धामन्रणयन्त देवाः ।

4.007.07c महाँ अग्निर्नमसा रातहव्यो वेरध्वराय सदमिदृतावा ॥

4.007.08a वेरध्वरस्य दूत्यानि विद्वानुभे अन्ता रोदसी संचिकित्वान् ।

4.007.08c दूत ईयसे प्रदिव उराणो विदुष्टरो दिव आरोधनानि ॥

4.007.09a कृष्णं त एम रुशतः पुरो भाश्चरिष्ण्वर्चिर्वपुषामिदेकम् ।

4.007.09c यदप्रवीता दधते ह गर्भं सद्यश्चिज्जातो भवसीदु दूतः ॥

4.007.10a सद्यो जातस्य ददृशानमोजो यदस्य वातो अनुवाति शोचिः ।

4.007.10c वृणक्ति तिग्मामतसेषु जिह्वां स्थिरा चिदन्ना दयते वि जम्भैः ॥

4.007.11a तृषु यदन्ना तृषुणा ववक्ष तृषुं दूतं कृणुते यह्वो अग्निः ।

4.007.11c वातस्य मेळिं सचते निजूर्वन्नाशुं न वाजयते हिन्वे अर्वा ॥

4.008.01a दूतं वो विश्ववेदसं हव्यवाहममर्त्यम् ।

4.008.01c यजिष्ठमृञ्जसे गिरा ॥

4.008.02a स हि वेदा वसुधितिं महाँ आरोधनं दिवः ।

4.008.02c स देवाँ एह वक्षति ॥

4.008.03a स वेद देव आनमं देवाँ ऋतायते दमे ।

4.008.03c दाति प्रियाणि चिद्वसु ॥

4.008.04a स होता सेदु दूत्यं चिकित्वाँ अन्तरीयते ।

4.008.04c विद्वाँ आरोधनं दिवः ॥

4.008.05a ते स्याम ये अग्नये ददाशुर्हव्यदातिभिः ।

4.008.05c य ईं पुष्यन्त इन्धते ॥

4.008.06a ते राया ते सुवीर्यैः ससवांसो वि शृण्विरे ।

4.008.06c ये अग्ना दधिरे दुवः ॥

4.008.07a अस्मे रायो दिवेदिवे सं चरन्तु पुरुस्पृहः ।

4.008.07c अस्मे वाजास ईरताम् ॥

4.008.08a स विप्रश्चर्षणीनां शवसा मानुषाणाम् ।

4.008.08c अति क्षिप्रेव विध्यति ॥

4.009.01a अग्ने मृळ महाँ असि य ईमा देवयुं जनम् ।

4.009.01c इयेथ बर्हिरासदम् ॥

4.009.02a स मानुषीषु दूळभो विक्षु प्रावीरमर्त्यः ।

4.009.02c दूतो विश्वेषां भुवत् ॥

4.009.03a स सद्म परि णीयते होता मन्द्रो दिविष्टिषु ।

4.009.03c उत पोता नि षीदति ॥

4.009.04a उत ग्ना अग्निरध्वर उतो गृहपतिर्दमे ।

4.009.04c उत ब्रह्मा नि षीदति ॥

4.009.05a वेषि ह्यध्वरीयतामुपवक्ता जनानाम् ।

4.009.05b हव्या च मानुषाणाम् ॥

4.009.06a वेषीद्वस्य दूत्यं१ यस्य जुजोषो अध्वरम् ।

4.009.06b हव्यं मर्तस्य वोळ्हवे ॥

4.009.07a अस्माकं जोष्यध्वरमस्माकं यज्ञमङ्गिरः ।

4.009.07c अस्माकं शृणुधी हवम् ॥

4.009.08a परि ते दूळभो रथोऽस्माँ अश्नोतु विश्वतः ।

4.009.08c येन रक्षसि दाशुषः ॥

4.010.01a अग्ने तमद्याश्वं न स्तोमैः क्रतुं न भद्रं हृदिस्पृशम् ।

4.010.01c ऋध्यामा त ओहैः ॥

4.010.02a अधा ह्यग्ने क्रतोर्भद्रस्य दक्षस्य साधोः ।

4.010.02c रथीरृतस्य बृहतो बभूथ ॥

4.010.03a एभिर्नो अर्कैर्भवा नो अर्वाङ्स्वर्१ण ज्योतिः ।

4.010.03c अग्ने विश्वेभिः सुमना अनीकैः ॥

4.010.04a आभिष्टे अद्य गीर्भिर्गृणन्तोऽग्ने दाशेम ।

4.010.04c प्र ते दिवो न स्तनयन्ति शुष्माः ॥

4.010.05a तव स्वादिष्ठाग्ने संदृष्टिरिदा चिदह्न इदा चिदक्तोः ।

4.010.05c श्रिये रुक्मो न रोचत उपाके ॥

4.010.06a घृतं न पूतं तनूररेपाः शुचि हिरण्यम् ।

4.010.06c तत्ते रुक्मो न रोचत स्वधावः ॥

4.010.07a कृतं चिद्धि ष्मा सनेमि द्वेषोऽग्न इनोषि मर्तात् ।

4.010.07c इत्था यजमानादृतावः ॥

4.010.08a शिवा नः सख्या सन्तु भ्रात्राग्ने देवेषु युष्मे ।

4.010.08c सा नो नाभिः सदने सस्मिन्नूधन् ॥

4.011.01a भद्रं ते अग्ने सहसिन्ननीकमुपाक आ रोचते सूर्यस्य ।

4.011.01c रुशद्दृशे ददृशे नक्तया चिदरूक्षितं दृश आ रूपे अन्नम् ॥

4.011.02a वि षाह्यग्ने गृणते मनीषां खं वेपसा तुविजात स्तवानः ।

4.011.02c विश्वेभिर्यद्वावनः शुक्र देवैस्तन्नो रास्व सुमहो भूरि मन्म ॥

4.011.03a त्वदग्ने काव्या त्वन्मनीषास्त्वदुक्था जायन्ते राध्यानि ।

4.011.03c त्वदेति द्रविणं वीरपेशा इत्थाधिये दाशुषे मर्त्याय ॥

4.011.04a त्वद्वाजी वाजम्भरो विहाया अभिष्टिकृज्जायते सत्यशुष्मः ।

4.011.04c त्वद्रयिर्देवजूतो मयोभुस्त्वदाशुर्जूजुवाँ अग्ने अर्वा ॥

4.011.05a त्वामग्ने प्रथमं देवयन्तो देवं मर्ता अमृत मन्द्रजिह्वम् ।

4.011.05c द्वेषोयुतमा विवासन्ति धीभिर्दमूनसं गृहपतिममूरम् ॥

4.011.06a आरे अस्मदमतिमारे अंह आरे विश्वां दुर्मतिं यन्निपासि ।

4.011.06c दोषा शिवः सहसः सूनो अग्ने यं देव आ चित्सचसे स्वस्ति ॥

4.012.01a यस्त्वामग्न इनधते यतस्रुक्त्रिस्ते अन्नं कृणवत्सस्मिन्नहन् ।

4.012.01c स सु द्युम्नैरभ्यस्तु प्रसक्षत्तव क्रत्वा जातवेदश्चिकित्वान् ॥

4.012.02a इध्मं यस्ते जभरच्छश्रमाणो महो अग्ने अनीकमा सपर्यन् ।

4.012.02c स इधानः प्रति दोषामुषासं पुष्यन्रयिं सचते घ्नन्नमित्रान् ॥

4.012.03a अग्निरीशे बृहतः क्षत्रियस्याग्निर्वाजस्य परमस्य रायः ।

4.012.03c दधाति रत्नं विधते यविष्ठो व्यानुषङ्मर्त्याय स्वधावान् ॥

4.012.04a यच्चिद्धि ते पुरुषत्रा यविष्ठाचित्तिभिश्चकृमा कच्चिदागः ।

4.012.04c कृधी ष्व१स्माँ अदितेरनागान्व्येनांसि शिश्रथो विष्वगग्ने ॥

4.012.05a महश्चिदग्न एनसो अभीक ऊर्वाद्देवानामुत मर्त्यानाम् ।

4.012.05c मा ते सखायः सदमिद्रिषाम यच्छा तोकाय तनयाय शं योः ॥

4.012.06a यथा ह त्यद्वसवो गौर्यं चित्पदि षितामममुञ्चता यजत्राः ।

4.012.06c एवो ष्व१स्मन्मुञ्चता व्यंहः प्र तार्यग्ने प्रतरं न आयुः ॥

4.013.01a प्रत्यग्निरुषसामग्रमख्यद्विभातीनां सुमना रत्नधेयम् ।

4.013.01c यातमश्विना सुकृतो दुरोणमुत्सूर्यो ज्योतिषा देव एति ॥

4.013.02a ऊर्ध्वं भानुं सविता देवो अश्रेद्द्रप्सं दविध्वद्गविषो न सत्वा ।

4.013.02c अनु व्रतं वरुणो यन्ति मित्रो यत्सूर्यं दिव्यारोहयन्ति ॥

4.013.03a यं सीमकृण्वन्तमसे विपृचे ध्रुवक्षेमा अनवस्यन्तो अर्थम् ।

4.013.03c तं सूर्यं हरितः सप्त यह्वी स्पशं विश्वस्य जगतो वहन्ति ॥

4.013.04a वहिष्ठेभिर्विहरन्यासि तन्तुमवव्ययन्नसितं देव वस्म ।

4.013.04c दविध्वतो रश्मयः सूर्यस्य चर्मेवावाधुस्तमो अप्स्व१न्तः ॥

4.013.05a अनायतो अनिबद्धः कथायं न्यङ्ङुत्तानोऽव पद्यते न ।

4.013.05c कया याति स्वधया को ददर्श दिव स्कम्भः समृतः पाति नाकम् ॥

4.014.01a प्रत्यग्निरुषसो जातवेदा अख्यद्देवो रोचमाना महोभिः ।

4.014.01c आ नासत्योरुगाया रथेनेमं यज्ञमुप नो यातमच्छ ॥

4.014.02a ऊर्ध्वं केतुं सविता देवो अश्रेज्ज्योतिर्विश्वस्मै भुवनाय कृण्वन् ।

4.014.02c आप्रा द्यावापृथिवी अन्तरिक्षं वि सूर्यो रश्मिभिश्चेकितानः ॥

4.014.03a आवहन्त्यरुणीर्ज्योतिषागान्मही चित्रा रश्मिभिश्चेकिताना ।

4.014.03c प्रबोधयन्ती सुविताय देव्यु१षा ईयते सुयुजा रथेन ॥

4.014.04a आ वां वहिष्ठा इह ते वहन्तु रथा अश्वास उषसो व्युष्टौ ।

4.014.04c इमे हि वां मधुपेयाय सोमा अस्मिन्यज्ञे वृषणा मादयेथाम् ॥

4.014.05a अनायतो अनिबद्धः कथायं न्यङ्ङुत्तानोऽव पद्यते न ।

4.014.05c कया याति स्वधया को ददर्श दिव स्कम्भः समृतः पाति नाकम् ॥

4.015.01a अग्निर्होता नो अध्वरे वाजी सन्परि णीयते ।

4.015.01c देवो देवेषु यज्ञियः ॥

4.015.02a परि त्रिविष्ट्यध्वरं यात्यग्नी रथीरिव ।

4.015.02c आ देवेषु प्रयो दधत् ॥

4.015.03a परि वाजपतिः कविरग्निर्हव्यान्यक्रमीत् ।

4.015.03c दधद्रत्नानि दाशुषे ॥

4.015.04a अयं यः सृञ्जये पुरो दैववाते समिध्यते ।

4.015.04c द्युमाँ अमित्रदम्भनः ॥

4.015.05a अस्य घा वीर ईवतोऽग्नेरीशीत मर्त्यः ।

4.015.05c तिग्मजम्भस्य मीळ्हुषः ॥

4.015.06a तमर्वन्तं न सानसिमरुषं न दिवः शिशुम् ।

4.015.06c मर्मृज्यन्ते दिवेदिवे ॥

4.015.07a बोधद्यन्मा हरिभ्यां कुमारः साहदेव्यः ।

4.015.07c अच्छा न हूत उदरम् ॥

4.015.08a उत त्या यजता हरी कुमारात्साहदेव्यात् ।

4.015.08c प्रयता सद्य आ ददे ॥

4.015.09a एष वां देवावश्विना कुमारः साहदेव्यः ।

4.015.09c दीर्घायुरस्तु सोमकः ॥

4.015.10a तं युवं देवावश्विना कुमारं साहदेव्यम् ।

4.015.10c दीर्घायुषं कृणोतन ॥

4.016.01a आ सत्यो यातु मघवाँ ऋजीषी द्रवन्त्वस्य हरय उप नः ।

4.016.01c तस्मा इदन्धः सुषुमा सुदक्षमिहाभिपित्वं करते गृणानः ॥

4.016.02a अव स्य शूराध्वनो नान्तेऽस्मिन्नो अद्य सवने मन्दध्यै ।

4.016.02c शंसात्युक्थमुशनेव वेधाश्चिकितुषे असुर्याय मन्म ॥

4.016.03a कविर्न निण्यं विदथानि साधन्वृषा यत्सेकं विपिपानो अर्चात् ।

4.016.03c दिव इत्था जीजनत्सप्त कारूनह्ना चिच्चक्रुर्वयुना गृणन्तः ॥

4.016.04a स्वर्यद्वेदि सुदृशीकमर्कैर्महि ज्योती रुरुचुर्यद्ध वस्तोः ।

4.016.04c अन्धा तमांसि दुधिता विचक्षे नृभ्यश्चकार नृतमो अभिष्टौ ॥

4.016.05a ववक्ष इन्द्रो अमितमृजीष्युभे आ पप्रौ रोदसी महित्वा ।

4.016.05c अतश्चिदस्य महिमा वि रेच्यभि यो विश्वा भुवना बभूव ॥

4.016.06a विश्वानि शक्रो नर्याणि विद्वानपो रिरेच सखिभिर्निकामैः ।

4.016.06c अश्मानं चिद्ये बिभिदुर्वचोभिर्व्रजं गोमन्तमुशिजो वि वव्रुः ॥

4.016.07a अपो वृत्रं वव्रिवांसं पराहन्प्रावत्ते वज्रं पृथिवी सचेताः ।

4.016.07c प्रार्णांसि समुद्रियाण्यैनोः पतिर्भवञ्छवसा शूर धृष्णो ॥

4.016.08a अपो यदद्रिं पुरुहूत दर्दराविर्भुवत्सरमा पूर्व्यं ते ।

4.016.08c स नो नेता वाजमा दर्षि भूरिं गोत्रा रुजन्नङ्गिरोभिर्गृणानः ॥

4.016.09a अच्छा कविं नृमणो गा अभिष्टौ स्वर्षाता मघवन्नाधमानम् ।

4.016.09c ऊतिभिस्तमिषणो द्युम्नहूतौ नि मायावानब्रह्मा दस्युरर्त ॥

4.016.10a आ दस्युघ्ना मनसा याह्यस्तं भुवत्ते कुत्सः सख्ये निकामः ।

4.016.10c स्वे योनौ नि षदतं सरूपा वि वां चिकित्सदृतचिद्ध नारी ॥

4.016.11a यासि कुत्सेन सरथमवस्युस्तोदो वातस्य हर्योरीशानः ।

4.016.11c ऋज्रा वाजं न गध्यं युयूषन्कविर्यदहन्पार्याय भूषात् ॥

4.016.12a कुत्साय शुष्णमशुषं नि बर्हीः प्रपित्वे अह्नः कुयवं सहस्रा ।

4.016.12c सद्यो दस्यून्प्र मृण कुत्स्येन प्र सूरश्चक्रं वृहतादभीके ॥

4.016.13a त्वं पिप्रुं मृगयं शूशुवांसमृजिश्वने वैदथिनाय रन्धीः ।

4.016.13c पञ्चाशत्कृष्णा नि वपः सहस्रात्कं न पुरो जरिमा वि दर्दः ॥

4.016.14a सूर उपाके तन्वं१ दधानो वि यत्ते चेत्यमृतस्य वर्पः ।

4.016.14c मृगो न हस्ती तविषीमुषाणः सिंहो न भीम आयुधानि बिभ्रत् ॥

4.016.15a इन्द्रं कामा वसूयन्तो अग्मन्स्वर्मीळ्हे न सवने चकानाः ।

4.016.15c श्रवस्यवः शशमानास उक्थैरोको न रण्वा सुदृशीव पुष्टिः ॥

4.016.16a तमिद्व इन्द्रं सुहवं हुवेम यस्ता चकार नर्या पुरूणि ।

4.016.16c यो मावते जरित्रे गध्यं चिन्मक्षू वाजं भरति स्पार्हराधाः ॥

4.016.17a तिग्मा यदन्तरशनिः पताति कस्मिञ्चिच्छूर मुहुके जनानाम् ।

4.016.17c घोरा यदर्य समृतिर्भवात्यध स्मा नस्तन्वो बोधि गोपाः ॥

4.016.18a भुवोऽविता वामदेवस्य धीनां भुवः सखावृको वाजसातौ ।

4.016.18c त्वामनु प्रमतिमा जगन्मोरुशंसो जरित्रे विश्वध स्याः ॥

4.016.19a एभिर्नृभिरिन्द्र त्वायुभिष्ट्वा मघवद्भिर्मघवन्विश्व आजौ ।

4.016.19c द्यावो न द्युम्नैरभि सन्तो अर्यः क्षपो मदेम शरदश्च पूर्वीः ॥

4.016.20a एवेदिन्द्राय वृषभाय वृष्णे ब्रह्माकर्म भृगवो न रथम् ।

4.016.20c नू चिद्यथा नः सख्या वियोषदसन्न उग्रोऽविता तनूपाः ॥

4.016.21a नू ष्टुत इन्द्र नू गृणान इषं जरित्रे नद्यो३ न पीपेः ।

4.016.21c अकारि ते हरिवो ब्रह्म नव्यं धिया स्याम रथ्यः सदासाः ॥

4.017.01a त्वं महाँ इन्द्र तुभ्यं ह क्षा अनु क्षत्रं मंहना मन्यत द्यौः ।

4.017.01c त्वं वृत्रं शवसा जघन्वान्सृजः सिन्धूँरहिना जग्रसानान् ॥

4.017.02a तव त्विषो जनिमन्रेजत द्यौ रेजद्भूमिर्भियसा स्वस्य मन्योः ।

4.017.02c ऋघायन्त सुभ्व१ः पर्वतास आर्दन्धन्वानि सरयन्त आपः ॥

4.017.03a भिनद्गिरिं शवसा वज्रमिष्णन्नाविष्कृण्वानः सहसान ओजः ।

4.017.03c वधीद्वृत्रं वज्रेण मन्दसानः सरन्नापो जवसा हतवृष्णीः ॥

4.017.04a सुवीरस्ते जनिता मन्यत द्यौरिन्द्रस्य कर्ता स्वपस्तमो भूत् ।

4.017.04c य ईं जजान स्वर्यं सुवज्रमनपच्युतं सदसो न भूम ॥

4.017.05a य एक इच्च्यावयति प्र भूमा राजा कृष्टीनां पुरुहूत इन्द्रः ।

4.017.05c सत्यमेनमनु विश्वे मदन्ति रातिं देवस्य गृणतो मघोनः ॥

4.017.06a सत्रा सोमा अभवन्नस्य विश्वे सत्रा मदासो बृहतो मदिष्ठाः ।

4.017.06c सत्राभवो वसुपतिर्वसूनां दत्रे विश्वा अधिथा इन्द्र कृष्टीः ॥

4.017.07a त्वमध प्रथमं जायमानोऽमे विश्वा अधिथा इन्द्र कृष्टीः ।

4.017.07c त्वं प्रति प्रवत आशयानमहिं वज्रेण मघवन्वि वृश्चः ॥

4.017.08a सत्राहणं दाधृषिं तुम्रमिन्द्रं महामपारं वृषभं सुवज्रम् ।

4.017.08c हन्ता यो वृत्रं सनितोत वाजं दाता मघानि मघवा सुराधाः ॥

4.017.09a अयं वृतश्चातयते समीचीर्य आजिषु मघवा शृण्व एकः ।

4.017.09c अयं वाजं भरति यं सनोत्यस्य प्रियासः सख्ये स्याम ॥

4.017.10a अयं शृण्वे अध जयन्नुत घ्नन्नयमुत प्र कृणुते युधा गाः ।

4.017.10c यदा सत्यं कृणुते मन्युमिन्द्रो विश्वं दृळ्हं भयत एजदस्मात् ॥

4.017.11a समिन्द्रो गा अजयत्सं हिरण्या समश्विया मघवा यो ह पूर्वीः ।

4.017.11c एभिर्नृभिर्नृतमो अस्य शाकै रायो विभक्ता सम्भरश्च वस्वः ॥

4.017.12a कियत्स्विदिन्द्रो अध्येति मातुः कियत्पितुर्जनितुर्यो जजान ।

4.017.12c यो अस्य शुष्मं मुहुकैरियर्ति वातो न जूत स्तनयद्भिरभ्रैः ॥

4.017.13a क्षियन्तं त्वमक्षियन्तं कृणोतीयर्ति रेणुं मघवा समोहम् ।

4.017.13c विभञ्जनुरशनिमाँ इव द्यौरुत स्तोतारं मघवा वसौ धात् ॥

4.017.14a अयं चक्रमिषणत्सूर्यस्य न्येतशं रीरमत्ससृमाणम् ।

4.017.14b आ कृष्ण ईं जुहुराणो जिघर्ति त्वचो बुध्ने रजसो अस्य योनौ ॥

4.017.15a असिक्न्यां यजमानो न होता ॥

4.017.16a गव्यन्त इन्द्रं सख्याय विप्रा अश्वायन्तो वृषणं वाजयन्तः ।

4.017.16c जनीयन्तो जनिदामक्षितोतिमा च्यावयामोऽवते न कोशम् ॥

4.017.17a त्राता नो बोधि ददृशान आपिरभिख्याता मर्डिता सोम्यानाम् ।

4.017.17c सखा पिता पितृतमः पितॄणां कर्तेमु लोकमुशते वयोधाः ॥

4.017.18a सखीयतामविता बोधि सखा गृणान इन्द्र स्तुवते वयो धाः ।

4.017.18c वयं ह्या ते चकृमा सबाध आभिः शमीभिर्महयन्त इन्द्र ॥

4.017.19a स्तुत इन्द्रो मघवा यद्ध वृत्रा भूरीण्येको अप्रतीनि हन्ति ।

4.017.19c अस्य प्रियो जरिता यस्य शर्मन्नकिर्देवा वारयन्ते न मर्ताः ॥

4.017.20a एवा न इन्द्रो मघवा विरप्शी करत्सत्या चर्षणीधृदनर्वा ।

4.017.20c त्वं राजा जनुषां धेह्यस्मे अधि श्रवो माहिनं यज्जरित्रे ॥

4.017.21a नू ष्टुत इन्द्र नू गृणान इषं जरित्रे नद्यो३ न पीपेः ।

4.017.21c अकारि ते हरिवो ब्रह्म नव्यं धिया स्याम रथ्यः सदासाः ॥

4.018.01a अयं पन्था अनुवित्तः पुराणो यतो देवा उदजायन्त विश्वे ।

4.018.01c अतश्चिदा जनिषीष्ट प्रवृद्धो मा मातरममुया पत्तवे कः ॥

4.018.02a नाहमतो निरया दुर्गहैतत्तिरश्चता पार्श्वान्निर्गमाणि ।

4.018.02c बहूनि मे अकृता कर्त्वानि युध्यै त्वेन सं त्वेन पृच्छै ॥

4.018.03a परायतीं मातरमन्वचष्ट न नानु गान्यनु नू गमानि ।

4.018.03c त्वष्टुर्गृहे अपिबत्सोममिन्द्रः शतधन्यं चम्वोः सुतस्य ॥

4.018.04a किं स ऋधक्कृणवद्यं सहस्रं मासो जभार शरदश्च पूर्वीः ।

4.018.04c नही न्वस्य प्रतिमानमस्त्यन्तर्जातेषूत ये जनित्वाः ॥

4.018.05a अवद्यमिव मन्यमाना गुहाकरिन्द्रं माता वीर्येणा न्यृष्टम् ।

4.018.05c अथोदस्थात्स्वयमत्कं वसान आ रोदसी अपृणाज्जायमानः ॥

4.018.06a एता अर्षन्त्यललाभवन्तीरृतावरीरिव संक्रोशमानाः ।

4.018.06c एता वि पृच्छ किमिदं भनन्ति कमापो अद्रिं परिधिं रुजन्ति ॥

4.018.07a किमु ष्विदस्मै निविदो भनन्तेन्द्रस्यावद्यं दिधिषन्त आपः ।

4.018.07c ममैतान्पुत्रो महता वधेन वृत्रं जघन्वाँ असृजद्वि सिन्धून् ॥

4.018.08a ममच्चन त्वा युवतिः परास ममच्चन त्वा कुषवा जगार ।

4.018.08c ममच्चिदापः शिशवे ममृड्युर्ममच्चिदिन्द्रः सहसोदतिष्ठत् ॥

4.018.09a ममच्चन ते मघवन्व्यंसो निविविध्वाँ अप हनू जघान ।

4.018.09c अधा निविद्ध उत्तरो बभूवाञ्छिरो दासस्य सं पिणग्वधेन ॥

4.018.10a गृष्टिः ससूव स्थविरं तवागामनाधृष्यं वृषभं तुम्रमिन्द्रम् ।

4.018.10c अरीळ्हं वत्सं चरथाय माता स्वयं गातुं तन्व इच्छमानम् ॥

4.018.11a उत माता महिषमन्ववेनदमी त्वा जहति पुत्र देवाः ।

4.018.11c अथाब्रवीद्वृत्रमिन्द्रो हनिष्यन्सखे विष्णो वितरं वि क्रमस्व ॥

4.018.12a कस्ते मातरं विधवामचक्रच्छयुं कस्त्वामजिघांसच्चरन्तम् ।

4.018.12c कस्ते देवो अधि मार्डीक आसीद्यत्प्राक्षिणाः पितरं पादगृह्य ॥

4.018.13a अवर्त्या शुन आन्त्राणि पेचे न देवेषु विविदे मर्डितारम् ।

4.018.13c अपश्यं जायाममहीयमानामधा मे श्येनो मध्वा जभार ॥

4.019.01a एवा त्वामिन्द्र वज्रिन्नत्र विश्वे देवासः सुहवास ऊमाः ।

4.019.01c महामुभे रोदसी वृद्धमृष्वं निरेकमिद्वृणते वृत्रहत्ये ॥

4.019.02a अवासृजन्त जिव्रयो न देवा भुवः सम्राळिन्द्र सत्ययोनिः ।

4.019.02c अहन्नहिं परिशयानमर्णः प्र वर्तनीररदो विश्वधेनाः ॥

4.019.03a अतृप्णुवन्तं वियतमबुध्यमबुध्यमानं सुषुपाणमिन्द्र ।

4.019.03c सप्त प्रति प्रवत आशयानमहिं वज्रेण वि रिणा अपर्वन् ॥

4.019.04a अक्षोदयच्छवसा क्षाम बुध्नं वार्ण वातस्तविषीभिरिन्द्रः ।

4.019.04c दृळ्हान्यौभ्नादुशमान ओजोऽवाभिनत्ककुभः पर्वतानाम् ॥

4.019.05a अभि प्र दद्रुर्जनयो न गर्भं रथा इव प्र ययुः साकमद्रयः ।

4.019.05c अतर्पयो विसृत उब्ज ऊर्मीन्त्वं वृताँ अरिणा इन्द्र सिन्धून् ॥

4.019.06a त्वं महीमवनिं विश्वधेनां तुर्वीतये वय्याय क्षरन्तीम् ।
4.019.06c अरमयो नमसैजदर्णः सुतरणाँ अकृणोरिन्द्र सिन्धून् ॥
4.019.07a प्राग्रुवो नभन्वो३ न वक्वा ध्वस्रा अपिन्वद्युवतीरृतज्ञाः ।
4.019.07c धन्वान्यज्राँ अपृणक्तृषाणाँ अधोगिन्द्र स्तर्यो३ दंसुपत्नीः ॥
4.019.08a पूर्वीरुषसः शरदश्च गूर्ता वृत्रं जघन्वाँ असृजद्वि सिन्धून् ।
4.019.08c परिष्ठिता अतृणद्बद्बधानाः सीरा इन्द्रः स्रवितवे पृथिव्या ॥
4.019.09a वम्रीभिः पुत्रमग्रुवो अदानं निवेशनाद्धरिव आ जभर्थ ।
4.019.09c व्य१न्धो अख्यदहिमाददानो निर्भूदुखच्छित्समरन्त पर्व ॥
4.019.10a प्र ते पूर्वाणि करणानि विप्राविद्वाँ आह विदुषे करांसि ।
4.019.10c यथायथा वृष्ण्यानि स्वगूर्तापांसि राजन्नर्याविवेषीः ॥
4.019.11a नू ष्टुत इन्द्र नू गृणान इषं जरित्रे नद्यो३ न पीपेः ।
4.019.11c अकारि ते हरिवो ब्रह्म नव्यं धिया स्याम रथ्यः सदासाः ॥

4.020.01a आ न इन्द्रो दूरादा न आसादभिष्टिकृदवसे यासदुग्रः ।
4.020.01c ओजिष्ठेभिर्नृपतिर्वज्रबाहुः संगे समत्सु तुर्वणिः पृतन्यून् ॥
4.020.02a आ न इन्द्रो हरिभिर्यात्वच्छार्वाचीनोऽवसे राधसे च ।
4.020.02c तिष्ठाति वज्री मघवा विरप्शीमं यज्ञमनु नो वाजसातौ ॥
4.020.03a इमं यज्ञं त्वमस्माकमिन्द्र पुरो दधत्सनिष्यसि क्रतुं नः ।

4.020.03c श्वघ्नीव वज्रिन्त्सनये धनानां त्वया वयमर्य आजिं जयेम ॥

4.020.04a उशन्नु षु णः सुमना उपाके सोमस्य नु सुषुतस्य स्वधावः ।

4.020.04c पा इन्द्र प्रतिभृतस्य मध्वः समन्धसा ममदः पृष्ठ्येन ॥

4.020.05a वि यो ररप्श ऋषिभिर्नवेभिर्वृक्षो न पक्वः सृण्यो न जेता ।

4.020.05c मर्यो न योषामभि मन्यमानोऽच्छा विवक्मि पुरुहूतमिन्द्रम् ॥

4.020.06a गिरिर्न यः स्वतवाँ ऋष्व इन्द्रः सनादेव सहसे जात उग्रः ।

4.020.06c आदर्ता वज्रं स्थविरं न भीम उद्नेव कोशं वसुना न्यृष्टम् ॥

4.020.07a न यस्य वर्ता जनुषा न्वस्ति न राधस आमरीता मघस्य ।

4.020.07c उद्वावृषाणस्तविषीव उग्रास्मभ्यं दद्धि पुरुहूत रायः ॥

4.020.08a ईक्षे रायः क्षयस्य चर्षणीनामुत व्रजमपवर्तासि गोनाम् ।

4.020.08c शिक्षानरः समिथेषु प्रहावान्वस्वो राशिमभिनेतासि भूरिम् ॥

4.020.09a कया तच्छृण्वे शच्या शचिष्ठो यया कृणोति मुहु का चिदृष्वः ।

4.020.09c पुरु दाशुषे विचयिष्ठो अंहोऽथा दधाति द्रविणं जरित्रे ॥

4.020.10a मा नो मर्धीरा भरा दद्धि तन्नः प्र दाशुषे दातवे भूरि यत्ते ।

4.020.10c नव्ये देष्णे शस्ते अस्मिन्त उक्थे प्र ब्रवाम वयमिन्द्र स्तुवन्तः ॥

4.020.11a नू ष्टुत इन्द्र नू गृणान इषं जरित्रे नद्यो३ न पीपेः ।

4.020.11c अकारि ते हरिवो ब्रह्म नव्यं धिया स्याम रथ्यः सदासाः ॥

4.021.01a आ यात्विन्द्रोऽवस उप न इह स्तुतः सधमादस्तु शूरः ।

4.021.01c वावृधानस्तविषीर्यस्य पूर्वीर्द्यौर्न क्षत्रमभिभूति पुष्यात् ॥

4.021.02a तस्येदिह स्तवथ वृष्ण्यानि तुविद्युम्नस्य तुविराधसो नॄन् ।

4.021.02c यस्य क्रतुर्विदथ्यो३ न सम्राट् साह्वान्तरुत्रो अभ्यस्ति कृष्टीः ॥

4.021.03a आ यात्विन्द्रो दिव आ पृथिव्या मक्षू समुद्रादुत वा पुरीषात् ।

4.021.03c स्वर्णरादवसे नो मरुत्वान्परावतो वा सदनादृतस्य ॥

4.021.04a स्थूरस्य रायो बृहतो य ईशे तमु ष्टवाम विदथेष्विन्द्रम् ।

4.021.04c यो वायुना जयति गोमतीषु प्र धृष्णुया नयति वस्यो अच्छ ॥

4.021.05a उप यो नमो नमसि स्तभायन्नियर्ति वाचं जनयन्यजध्यै ।

4.021.05c ऋञ्जसानः पुरुवार उक्थैरेन्द्रं कृण्वीत सदनेषु होता ॥

4.021.06a धिषा यदि धिषण्यन्तः सरण्यान्सदन्तो अद्रिमौशिजस्य गोहे ।

4.021.06c आ दुरोषाः पास्त्यस्य होता यो नो महान्संवरणेषु वह्निः ॥

4.021.07a सत्रा यदीं भार्वरस्य वृष्णः सिषक्ति शुष्म स्तुवते भराय ।

4.021.07c गुहा यदीमौशिजस्य गोहे प्र यद्धिये प्रायसे मदाय ॥

4.021.08a वि यद्वरांसि पर्वतस्य वृण्वे पयोभिर्जिन्वे अपां जवांसि ।

4.021.08c विदद्गौरस्य गवयस्य गोहे यदी वाजाय सुध्यो३ वहन्ति ॥

4.021.09a भद्रा ते हस्ता सुकृतोत पाणी प्रयन्तारा स्तुवते राध इन्द्र ।

4.021.09c का ते निषत्तिः किमु नो ममत्सि किं नोदुदु हर्षसे दातवा उ ॥

4.021.10a एवा वस्व इन्द्रः सत्यः सम्राड्ढन्ता वृत्रं वरिवः पूरवे कः ।

4.021.10c पुरुष्टुत क्रत्वा नः शग्धि रायो भक्षीय तेऽवसो दैव्यस्य ॥

4.021.11a नू ष्टुत इन्द्र नू गृणान इषं जरित्रे नद्यो३ न पीपेः ।

4.021.11c अकारि ते हरिवो ब्रह्म नव्यं धिया स्याम रथ्यः सदासाः ॥

4.022.01a यन्न इन्द्रो जुजुषे यच्च वष्टि तन्नो महान्करति शुष्म्या चित् ।

4.022.01c ब्रह्म स्तोमं मघवा सोममुक्था यो अश्मानं शवसा बिभ्रदेति ॥

4.022.02a वृषा वृषन्धिं चतुरश्रिमस्यन्नुग्रो बाहुभ्यां नृतमः शचीवान् ।

4.022.02c श्रिये परुष्णीमुषमाण ऊर्णां यस्याः पर्वाणि सख्याय विव्ये ॥

4.022.03a यो देवो देवतमो जायमानो महो वाजेभिर्महद्भिश्च शुष्मैः ।

4.022.03c दधानो वज्रं बाह्वोरुशन्तं द्याममेन रेजयत्प्र भूम ॥

4.022.04a विश्वा रोधांसि प्रवतश्च पूर्वीर्द्यौर्ऋष्वाज्जनिमन्रेजत क्षाः ।

4.022.04c आ मातरा भरति शुष्म्या गोर्नृवत्परिज्मन्नोनुवन्त वाताः ॥

4.022.05a ता तू त इन्द्र महतो महानि विश्वेष्वित्सवनेषु प्रवाच्या ।

4.022.05c यच्छूर धृष्णो धृषता दधृष्वानहिं वज्रेण शवसाविवेषीः ॥

4.022.06a ता तू ते सत्या तुविनृम्ण विश्वा प्र धेनवः सिस्रते वृष्ण ऊध्नः ।

4.022.06c अधा ह त्वद्वृषमणो भियानाः प्र सिन्धवो जवसा चक्रमन्त ॥

4.022.07a अत्राह ते हरिवस्ता उ देवीरवोभिरिन्द्र स्तवन्त स्वसारः ।

4.022.07c यत्सीमनु प्र मुचो बद्बधाना दीर्घामनु प्रसितिं स्यन्दयध्यै ॥

4.022.08a पिपीळे अंशुर्मद्यो न सिन्धुरा त्वा शमी शशमानस्य शक्तिः ।

4.022.08c अस्मद्र्यक्छुशुचानस्य यम्या आशुर्न रश्मिं तुव्योजसं गोः ॥

4.022.09a अस्मे वर्षिष्ठा कृणुहि ज्येष्ठा नृम्णानि सत्रा सहुरे सहांसि ।

4.022.09c अस्मभ्यं वृत्रा सुहनानि रन्धि जहि वधर्वनुषो मर्त्यस्य ॥

4.022.10a अस्माकमित्सु शृणुहि त्वमिन्द्रास्मभ्यं चित्राँ उप माहि वाजान् ।

4.022.10c अस्मभ्यं विश्वा इषणः पुरंधीरस्माकं सु मघवन्बोधि गोदाः ॥

4.022.11a नू ष्टुत इन्द्र नू गृणान इषं जरित्रे नद्यो३ न पीपेः ।

4.022.11c अकारि ते हरिवो ब्रह्म नव्यं धिया स्याम रथ्यः सदासाः ॥

4.023.01a कथा महामवृधत्कस्य होतुर्यज्ञं जुषाणो अभि सोममूधः ।

4.023.01c पिबन्नुशानो जुषमाणो अन्धो ववक्ष ऋष्वः शुचते धनाय ॥

4.023.02a को अस्य वीरः सधमादमाप समानंश सुमतिभिः को अस्य ।

4.023.02c कदस्य चित्रं चिकिते कदूती वृधे भुवच्छशमानस्य यज्योः ॥

4.023.03a कथा शृणोति हूयमानमिन्द्रः कथा शृण्वन्नवसामस्य वेद ।

4.023.03c का अस्य पूर्वीरुपमातयो ह कथैनमाहुः पपुरिं जरित्रे ॥

4.023.04a कथा सबाधः शशमानो अस्य नशदभि द्रविणं दीध्यानः ।

4.023.04c देवो भुवन्नवेदा म ऋतानां नमो जगृभ्वाँ अभि यज्जुजोषत् ॥

4.023.05a कथा कदस्या उषसो व्युष्टौ देवो मर्तस्य सख्यं जुजोष ।

4.023.05c कथा कदस्य सख्यं सखिभ्यो ये अस्मिन्कामं सुयुजं ततस्रे ॥

4.023.06a किमादमत्रं सख्यं सखिभ्यः कदा नु ते भ्रात्रं प्र ब्रवाम ।

4.023.06c श्रिये सुदृशो वपुरस्य सर्गाः स्व१र्ण चित्रतममिष आ गोः ॥

4.023.07a द्रुहं जिघांसन्ध्वरसमनिन्द्रां तेतिक्ते तिग्मा तुजसे अनीका ।

4.023.07c ऋणा चिद्यत्र ऋणया न उग्रो दूरे अज्ञाता उषसो बबाधे ॥

4.023.08a ऋतस्य हि शुरुधः सन्ति पूर्वीरृतस्य धीतिर्वृजिनानि हन्ति ।

4.023.08c ऋतस्य श्लोको बधिरा ततर्द कर्णा बुधानः शुचमान आयोः ॥

4.023.09a ऋतस्य दृळ्हा धरुणानि सन्ति पुरूणि चन्द्रा वपुषे वपूंषि ।

4.023.09c ऋतेन दीर्घमिषणन्त पृक्ष ऋतेन गाव ऋतमा विवेशुः ॥

4.023.10a ऋतं येमान ऋतमिद्वनोत्यृतस्य शुष्मस्तुरया उ गव्युः ।

4.023.10c ऋताय पृथ्वी बहुले गभीरे ऋताय धेनू परमे दुहाते ॥

4.023.11a नू ष्टुत इन्द्र नू गृणान इषं जरित्रे नद्यो३ न पीपेः ।

4.023.11c अकारि ते हरिवो ब्रह्म नव्यं धिया स्याम रथ्यः सदासाः ॥

4.024.01a का सुष्टुतिः शवसः सूनुमिन्द्रमर्वाचीनं राधस आ ववर्तत् ।

4.024.01c ददिर्हि वीरो गृणते वसूनि स गोपतिर्निष्षिधां नो जनासः ॥

4.024.02a स वृत्रहत्ये हव्यः स ईड्यः स सुष्टुत इन्द्रः सत्यराधाः ।

4.024.02c स यामन्ना मघवा मर्त्याय ब्रह्मण्यते सुष्वये वरिवो धात् ॥

4.024.03a तमिन्नरो वि ह्वयन्ते समीके रिरिक्वांसस्तन्वः कृण्वत त्राम् ।

4.024.03c मिथो यत्त्यागमुभयासो अग्मन्नरस्तोकस्य तनयस्य सातौ ॥

4.024.04a क्रतूयन्ति क्षितयो योग उग्राशुषाणासो मिथो अर्णसातौ ।

4.024.04c सं यद्विशोऽववृत्रन्त युध्मा आदिन्नेम इन्द्रयन्ते अभीके ॥

4.024.05a आदिद्ध नेम इन्द्रियं यजन्त आदित्पक्तिः पुरोळाशं रिरिच्यात् ।

4.024.05c आदित्सोमो वि पपृच्यादसुष्वीनादिज्जुजोष वृषभं यजध्यै ॥

4.024.06a कृणोत्यस्मै वरिवो य इत्थेन्द्राय सोममुशते सुनोति ।

4.024.06c सध्रीचीनेन मनसाविवेनन्तमित्सखायं कृणुते समत्सु ॥

4.024.07a य इन्द्राय सुनवत्सोममद्य पचात्पक्तीरुत भृज्जाति धानाः ।

4.024.07c प्रति मनायोरुचथानि हर्यन्तस्मिन्दधद्वृषणं शुष्ममिन्द्रः ॥

4.024.08a यदा समर्यं व्यचेदृघावा दीर्घं यदाजिमभ्यख्यदर्यः ।

4.024.08c अचिक्रदद्वृषणं पत्न्यच्छा दुरोण आ निशितं सोमसुद्भिः ॥

4.024.09a भूयसा वस्नमचरत्कनीयोऽविक्रीतो अकानिषं पुनर्यन् ।

4.024.09c स भूयसा कनीयो नारिरेचीद्दीना दक्षा वि दुहन्ति प्र वाणम् ॥

4.024.10a क इमं दशभिर्ममेन्द्रं क्रीणाति धेनुभिः ।

4.024.10c यदा वृत्राणि जङ्घनदथैनं मे पुनर्ददत् ॥

4.024.11a नू ष्टुत इन्द्र नू गृणान इषं जरित्रे नद्यो३ न पीपेः ।

4.024.11c अकारि ते हरिवो ब्रह्म नव्यं धिया स्याम रथ्यः सदासाः ॥

4.025.01a को अद्य नर्यो देवकाम उशन्निन्द्रस्य सख्यं जुजोष ।

4.025.01c को वा महेऽवसे पार्याय समिद्धे अग्नौ सुतसोम ईट्टे ॥

4.025.02a को नानाम वचसा सोम्याय मनायुर्वा भवति वस्त उस्राः ।

4.025.02c क इन्द्रस्य युज्यं कः सखित्वं को भ्रात्रं वष्टि कवये क ऊती ॥

4.025.03a को देवानामवो अद्या वृणीते क आदित्याँ अदितिं ज्योतिरीट्टे ।

4.025.03c कस्याश्विनाविन्द्रो अग्निः सुतस्यांशोः पिबन्ति मनसाविवेनम् ॥

4.025.04a तस्मा अग्निर्भारतः शर्म यंसज्ज्योक्पश्यात्सूर्यमुच्चरन्तम् ।

4.025.04c य इन्द्राय सुनवामेत्याह नरे नर्याय नृतमाय नृणाम् ॥

4.025.05a न तं जिनन्ति बहवो न दभ्रा उर्वस्मा अदितिः शर्म यंसत् ।

4.025.05c प्रियः सुकृत्प्रिय इन्द्रे मनायुः प्रियः सुप्रावीः प्रियो अस्य सोमी ॥

4.025.06a सुप्राव्यः प्राशुषाळेष वीरः सुष्वेः पक्तिं कृणुते केवलेन्द्रः ।

4.025.06c नासुष्वेरापिर्न सखा न जामिर्दुष्प्राव्योऽवहन्तेदवाचः ॥

4.025.07a न रेवता पणिना सख्यमिन्द्रोऽसुन्वता सुतपाः सं गृणीते ।

4.025.07c आस्य वेदः खिदति हन्ति नग्नं वि सुष्वये पक्तये केवलो भूत् ॥

4.025.08a इन्द्रं परेऽवरे मध्यमास इन्द्रं यान्तोऽवसितास इन्द्रम् ।

4.025.08c इन्द्रं क्षियन्त उत युध्यमाना इन्द्रं नरो वाजयन्तो हवन्ते ॥

4.026.01a अहं मनुरभवं सूर्यश्चाहं कक्षीवाँ ऋषिरस्मि विप्रः ।

4.026.01c अहं कुत्समार्जुनेयं न्यृञ्जेऽहं कविरुशना पश्यता मा ॥

4.026.02a अहं भूमिमददामार्यायाहं वृष्टिं दाशुषे मर्त्याय ।

4.026.02c अहमपो अनयं वावशाना मम देवासो अनु केतमायन् ॥

4.026.03a अहं पुरो मन्दसानो व्यैरं नव साकं नवतीः शम्बरस्य ।

4.026.03c शततमं वेश्यं सर्वताता दिवोदासमतिथिग्वं यदावम् ॥

4.026.04a प्र सु ष विभ्यो मरुतो विरस्तु प्र श्येनः श्येनेभ्य आशुपत्वा ।

4.026.04c अचक्रया यत्स्वधया सुपर्णो हव्यं भरन्मनवे देवजुष्टम् ॥

4.026.05a भरद्यदि विरतो वेविजानः पथोरुणा मनोजवा असर्जि ।

4.026.05c तूयं ययौ मधुना सोम्येनोत श्रवो विविदे श्येनो अत्र ॥

4.026.06a ऋजीपी श्येनो ददमानो अंशुं परावतः शकुनो मन्द्रं मदम् ।

4.026.06c सोमं भरद्दादृहाणो देवावान्दिवो अमुष्मादुत्तरादादाय ॥

4.026.07a आदाय श्येनो अभरत्सोमं सहस्रं सवाँ अयुतं च साकम् ।

4.026.07c अत्रा पुरंधिरजहादरातीर्मदे सोमस्य मूरा अमूरः ॥

4.027.01a गर्भे नु सन्नन्वेषामवेदमहं देवानां जनिमानि विश्वा ।

4.027.01c शतं मा पुर आयसीररक्षन्नध श्येनो जवसा निरदीयम् ॥

4.027.02a न घा स मामप जोषं जभाराभीमास त्वक्षसा वीर्येण ।

4.027.02c ईर्मा पुरंधिरजहादरातीरुत वाताँ अतरच्छूशुवानः ॥

4.027.03a अव यच्छ्येनो अस्वनीदध द्योर्वि यद्यदि वात ऊहुः पुरंधिम् ।

4.027.03c सृजद्यदस्मा अव ह क्षिपज्ज्यां कृशानुरस्ता मनसा भुरण्यन् ॥

4.027.04a ऋजिप्य ईमिन्द्रावतो न भुज्युं श्येनो जभार बृहतो अधि ष्णोः ।

4.027.04c अन्तः पतत्पतत्र्यस्य पर्णमध यामनि प्रसितस्य तद्वेः ॥

4.027.05a अध श्वेतं कलशं गोभिरक्तमापिप्यानं मघवा शुक्रमन्धः ।

4.027.05c अध्वर्युभिः प्रयतं मध्वो अग्रमिन्द्रो मदाय प्रति धत्पिबध्यै शूरो मदाय प्रति धत्पिबध्यै ॥

4.028.01a त्वा युजा तव तत्सोम सख्य इन्द्रो अपो मनवे सस्रुतस्कः ।

4.028.01c अहन्नहिमरिणात्सप्त सिन्धूनपावृणोदपिहितेव खानि ॥

4.028.02a त्वा युजा नि खिदत्सूर्यस्येन्द्रश्चक्रं सहसा सद्य इन्दो ।

4.028.02c अधि ष्णुना बृहता वर्तमानं महो द्रुहो अप विश्वायु धायि ॥

4.028.03a अहन्निन्द्रो अदहदग्निरिन्दो पुरा दस्यून्मध्यंदिनादभीके ।

4.028.03c दुर्गे दुरोणे क्रत्वा न यातां पुरू सहस्रा शर्वा नि बर्हीत् ॥

4.028.04a विश्वस्मात्सीमधमाँ इन्द्र दस्यून्विशो दासीरकृणोरप्रशस्ताः ।

4.028.04c अबाधेथाममृणतं नि शत्रूनविन्देथामपचितिं वधत्रैः ॥

4.028.05a एवा सत्यं मघवाना युवं तदिन्द्रश्च सोमोर्वमश्व्यं गोः ।

4.028.05c आदर्दतमपिहितान्यश्ना रिरिचथुः क्षाश्चित्ततृदाना ॥

4.029.01a आ न स्तुत उप वाजेभिरूती इन्द्र याहि हरिभिर्मन्दसानः ।

4.029.01c तिरश्चिदर्यः सवना पुरूण्याङ्गूषेभिर्गृणानः सत्यराधाः ॥

4.029.02a आ हि ष्मा याति नर्यश्चिकित्वान्हूयमानः सोतृभिरुप यज्ञम् ।

4.029.02c स्वश्वो यो अभीरुर्मन्यमानः सुष्वाणेभिर्मदति सं ह वीरैः ॥

4.029.03a श्रावयेदस्य कर्णा वाजयध्यै जुष्टामनु प्र दिशं मन्दयध्यै ।

4.029.03c उद्वावृषाणो राधसे तुविष्मान्करन्न इन्द्रः सुतीर्थाभयं च ॥

4.029.04a अच्छा यो गन्ता नाधमानमूती इत्था विप्रं हवमानं गृणन्तम् ।

4.029.04c उप त्मनि दधानो धुर्या३शून्सहस्राणि शतानि वज्रबाहुः ॥

4.029.05a त्वोतासो मघवन्निन्द्र विप्रा वयं ते स्याम सूरयो गृणन्तः ।

4.029.05c भेजानासो बृहद्दिवस्य राय आकाय्यस्य दावने पुरुक्षोः ॥

4.030.01a नकिरिन्द्र त्वदुत्तरो न ज्यायाँ अस्ति वृत्रहन् ।

4.030.01c नकिरेवा यथा त्वम् ॥

4.030.02a सत्रा ते अनु कृष्टयो विश्वा चक्रेव वावृतुः ।

4.030.02c सत्रा महाँ असि श्रुतः ॥

4.030.03a विश्वे चनेदना त्वा देवास इन्द्र युयुधुः ।

4.030.03c यदहा नक्तमातिरः ॥

4.030.04a यत्रोत बाधितेभ्यश्चक्रं कुत्साय युध्यते ।

4.030.04c मुषाय इन्द्र सूर्यम् ॥

4.030.05a यत्र देवाँ ऋघायतो विश्वाँ अयुध्य एक इत् ।

4.030.05c त्वमिन्द्र वनूँरहन् ॥

4.030.06a यत्रोत मर्त्याय कमरिणा इन्द्र सूर्यम् ।

4.030.06c प्रावः शचीभिरेतशम् ॥

4.030.07a किमादुतासि वृत्रहन्मघवन्मन्युमत्तमः ।

4.030.07c अत्राह दानुमातिरः ॥

4.030.08a एतद्घेदुत वीर्य१मिन्द्र चकर्थ पौंस्यम् ।

4.030.08c स्त्रियं यद्दुर्हणायुवं वधीर्दुहितरं दिवः ॥

4.030.09a दिवश्चिद्घा दुहितरं महान्महीयमानाम् ।

4.030.09c उषासमिन्द्र सं पिणक् ॥

4.030.10a अपोषा अनसः सरत्सम्पिष्टादह बिभ्युषी ।

4.030.10c नि यत्सीं शिश्नथद्वृषा ॥

4.030.11a एतदस्या अनः शये सुसम्पिष्टं विपाश्या ।

4.030.11c ससार सीं परावतः ॥

4.030.12a उत सिन्धुं विबाल्यं वितस्थानामधि क्षमि ।

4.030.12c परि ष्ठा इन्द्र मायया ॥

4.030.13a उत शुष्णस्य धृष्णुया प्र मृक्षो अभि वेदनम् ।

4.030.13c पुरो यदस्य सम्पिणक् ॥

4.030.14a उत दासं कौलितरं बृहतः पर्वतादधि ।

4.030.14c अवाहन्निन्द्र शम्बरम् ॥

4.030.15a उत दासस्य वर्चिनः सहस्राणि शतावधीः ।

4.030.15c अधि पञ्च प्रधीँरिव ॥

4.030.16a उत त्यं पुत्रमग्रुवः परावृक्तं शतक्रतुः ।

4.030.16c उक्थेष्विन्द्र आभजत् ॥

4.030.17a उत त्या तुर्वशायदू अस्नातारा शचीपतिः ।

4.030.17c इन्द्रो विद्वाँ अपारयत् ॥

4.030.18a उत त्या सद्य आर्या सरयोरिन्द्र पारतः ।

4.030.18c अर्णाचित्ररथावधीः ॥

4.030.19a अनु द्वा जहिता नयोऽन्धं श्रोणं च वृत्रहन् ।

4.030.19c न तत्ते सुम्नमष्टवे ॥

4.030.20a शतमश्मन्मयीनां पुरामिन्द्रो व्यास्यत् ।

4.030.20c दिवोदासाय दाशुषे ॥

4.030.21a अस्वापयद्दभीतये सहस्रा त्रिंशतं हथैः ।

4.030.21c दासानामिन्द्रो मायया ॥

4.030.22a स घेदुतासि वृत्रहन्समान इन्द्र गोपतिः ।

4.030.22c यस्ता विश्वानि चिच्युषे ॥

4.030.23a उत नूनं यदिन्द्रियं करिष्या इन्द्र पौंस्यम् ।

4.030.23c अद्या नकिष्टदा मिनत् ॥

4.030.24a वामंवामं त आदुरे देवो ददात्वर्यमा ।

4.030.24c वामं पूषा वामं भगो वामं देवः करूळती ॥

4.031.01a कया नश्चित्र आ भुवदूती सदावृधः सखा ।

4.031.01c कया शचिष्ठया वृता ॥

4.031.02a कस्त्वा सत्यो मदानां मंहिष्ठो मत्सदन्धसः ।

4.031.02c दृळ्हा चिदारुजे वसु ॥

4.031.03a अभी षु णः सखीनामविता जरितॄणाम् ।

4.031.03c शतं भवास्यूतिभिः ॥

4.031.04a अभी न आ ववृत्स्व चक्रं न वृत्तमर्वतः ।

4.031.04c नियुद्भिश्चर्षणीनाम् ॥

4.031.05a प्रवता हि क्रतूनामा हा पदेव गच्छसि ।

4.031.05c अभक्षि सूर्ये सचा ॥

4.031.06a सं यत्त इन्द्र मन्यवः सं चक्राणि दधन्विरे ।

4.031.06c अध त्वे अध सूर्ये ॥

4.031.07a उत स्मा हि त्वामाहुरिन्मघवानं शचीपते ।

4.031.07c दातारमविदीधयुम् ॥

4.031.08a उत स्मा सद्य इत्परि शशमानाय सुन्वते ।

4.031.08c पुरू चिन्मंहसे वसु ॥

4.031.09a नहि ष्मा ते शतं चन राधो वरन्त आमुरः ।

4.031.09c न च्यौत्नानि करिष्यतः ॥

4.031.10a अस्माँ अवन्तु ते शतमस्मान्सहस्रमूतयः ।

4.031.10c अस्मान्विश्वा अभिष्टयः ॥

4.031.11a अस्माँ इहा वृणीष्व सख्याय स्वस्तये ।

4.031.11c महो राये दिवित्मते ॥

4.031.12a अस्माँ अविड्ढि विश्वहेन्द्र राया परीणसा ।

4.031.12c अस्मान्विश्वाभिरूतिभिः ॥

4.031.13a अस्मभ्यं ताँ अपा वृधि व्रजाँ अस्तेव गोमतः ।

4.031.13c नवाभिरिन्द्रोतिभिः ॥

4.031.14a अस्माकं धृष्णुया रथो द्युमाँ इन्द्रानपच्युतः ।

4.031.14c गव्युरश्वयुरीयते ॥

4.031.15a अस्माकमुत्तमं कृधि श्रवो देवेषु सूर्य ।

4.031.15c वर्षिष्ठं द्यामिवोपरि ॥

4.032.01a आ तू न इन्द्र वृत्रहन्नस्माकमर्धमा गहि ।

4.032.01c महान्महीभिरूतिभिः ॥

4.032.02a भृमिश्चिद्घासि तूतुजिरा चित्र चित्रिणीष्वा ।

4.032.02c चित्रं कृणोष्यूतये ॥

4.032.03a दभ्रेभिश्चिच्छशीयांसं हंसि व्राधन्तमोजसा ।

4.032.03c सखिभिर्ये त्वे सचा ॥

4.032.04a वयमिन्द्र त्वे सचा वयं त्वाभि नोनुमः ।

4.032.04c अस्माँअस्माँ इदुदव ॥

4.032.05a स नश्चित्राभिरद्रिवोऽनवद्याभिरूतिभिः ।

4.032.05c अनाधृष्टाभिरा गहि ॥

4.032.06a भूयामो षु त्वावतः सखाय इन्द्र गोमतः ।

4.032.06c युजो वाजाय घृष्वये ॥

4.032.07a त्वं ह्येक ईशिष इन्द्र वाजस्य गोमतः ।

4.032.07c स नो यन्धि महीमिषम् ॥

4.032.08a न त्वा वरन्ते अन्यथा यद्दित्ससि स्तुतो मघम् ।

4.032.08c स्तोतृभ्य इन्द्र गिर्वणः ॥

4.032.09a अभि त्वा गोतमा गिरानूषत प्र दावने ।

4.032.09c इन्द्र वाजाय घृष्वये ॥

4.032.10a प्र ते वोचाम वीर्या३ या मन्दसान आरुजः ।

4.032.10c पुरो दासीरभीत्य ॥

4.032.11a ता ते गृणन्ति वेधसो यानि चकर्थ पौंस्या ।

4.032.11c सुतेष्विन्द्र गिर्वणः ॥

4.032.12a अवीवृधन्त गोतमा इन्द्र त्वे स्तोमवाहसः ।

4.032.12c ऐषु धा वीरवद्यशः ॥

4.032.13a यच्चिद्धि शश्वतामसीन्द्र साधारणस्त्वम् ।

4.032.13c तं त्वा वयं हवामहे ॥

4.032.14a अर्वाचीनो वसो भवास्मे सु मत्स्वान्धसः ।

4.032.14c सोमानामिन्द्र सोमपाः ॥

4.032.15a अस्माकं त्वा मतीनामा स्तोम इन्द्र यच्छतु ।

4.032.15c अर्वागा वर्तया हरी ॥

4.032.16a पुरोळाशं च नो घसो जोषयासे गिरश्च नः ।

4.032.16c वधूयुरिव योषणाम् ॥

4.032.17a सहस्रं व्यतीनां युक्तानामिन्द्रमीमहे ।

4.032.17c शतं सोमस्य खार्यः ॥

4.032.18a सहस्रा ते शता वयं गवामा च्यावयामसि ।

4.032.18c अस्मत्रा राध एतु ते ॥

4.032.19a दश ते कलशानां हिरण्यानामधीमहि ।

4.032.19c भूरिदा असि वृत्रहन् ॥

4.032.20a भूरिदा भूरि देहि नो मा दभ्रं भूर्या भर ।

4.032.20c भूरि घेदिन्द्र दित्ससि ॥

4.032.21a भूरिदा ह्यसि श्रुतः पुरुत्रा शूर वृत्रहन् ।

4.032.21c आ नो भजस्व राधसि ॥

4.032.22a प्र ते बभ्रू विचक्षण शंसामि गोषणो नपात् ।

4.032.22c माभ्यां गा अनु शिश्रथः ॥

4.032.23a कनीनकेव विद्रधे नवे द्रुपदे अर्भके ।

4.032.23c बभ्रू यामेषु शोभेते ॥

4.032.24a अरं म उस्रयाम्णेऽरमनुस्रयाम्णे ।

4.032.24c बभ्रू यामेष्वस्रिधा ॥

4.033.01a प्र ऋभुभ्यो दूतमिव वाचमिष्य उपस्तिरे श्वैतरीं धेनुमीळे ।

4.033.01c ये वातजूतास्तरणिभिरेवैः परि द्यां सद्यो अपसो बभूवुः ॥

4.033.02a यदारमक्रन्नृभवः पितृभ्यां परिविष्टी वेषणा दंसनाभिः ।

4.033.02c आदिद्देवानामुप सख्यमायन्धीरासः पुष्टिमवहन्मनायै ॥

4.033.03a पुनर्ये चक्रुः पितरा युवाना सना यूपेव जरणा शयाना ।

4.033.03c ते वाजो विभ्वाँ ऋभुरिन्द्रवन्तो मधुप्सरसो नोऽवन्तु यज्ञम् ॥

4.033.04a यत्संवत्समृभवो गामरक्षन्यत्संवत्समृभवो मा अपिंशन् ।

4.033.04c यत्संवत्समभरन्भासो अस्यास्ताभिः शमीभिरमृतत्वमाशुः ॥

4.033.05a ज्येष्ठ आह चमसा द्वा करेति कनीयान्त्रीन्कृणवामेत्याह ।

4.033.05c कनिष्ठ आह चतुरस्करेति त्वष्ट ऋभवस्तत्पनयद्वचो वः ॥

4.033.06a सत्यमूचुर्नर एवा हि चक्रुरनु स्वधामृभवो जग्मुरेताम् ।

4.033.06c विभ्राजमानाँश्चमसाँ अहेवावेनत्त्वष्टा चतुरो ददृश्वान् ॥

4.033.07a द्वादश द्यून्यदगोह्यस्यातिथ्ये रणन्नृभवः ससन्तः ।

4.033.07c सुक्षेत्राकृण्वन्ननयन्त सिन्धून्धन्वातिष्ठन्नोषधीर्निम्नमापः ॥

4.033.08a रथं ये चक्रुः सुवृतं नरेष्ठां ये धेनुं विश्वजुवं विश्वरूपाम् ।

4.033.08c त आ तक्षन्त्वृभवो रयिं नः स्ववसः स्वपसः सुहस्ताः ॥

4.033.09a अपो ह्येषामजुषन्त देवा अभि क्रत्वा मनसा दीध्यानाः ।

4.033.09c वाजो देवानामभवत्सुकर्मेन्द्रस्य ऋभुक्षा वरुणस्य विभ्वा ॥

4.033.10a ये हरी मेधयोक्था मदन्त इन्द्राय चक्रुः सुयुजा ये अश्वा ।

4.033.10c ते रायस्पोषं द्रविणान्यस्मे धत्त ऋभवः क्षेमयन्तो न मित्रम् ॥

4.033.11a इदाह्नः पीतिमुत वो मदं धुर्न ऋते श्रान्तस्य सख्याय देवाः ।

4.033.11c ते नूनमस्मे ऋभवो वसूनि तृतीये अस्मिन्सवने दधात ॥

4.034.01a ऋभुर्विभ्वा वाज इन्द्रो नो अच्छेमं यज्ञं रत्नधेयोप यात ।

4.034.01c इदा हि वो धिषणा देव्यह्नामधात्पीतिं सं मदा अग्मता वः ॥

4.034.02a विदानासो जन्मनो वाजरत्ना उत ऋतुभिर्ऋभवो मादयध्वम् ।

4.034.02c सं वो मदा अग्मत सं पुरंधिः सुवीरामस्मे रयिमेरयध्वम् ॥

4.034.03a अयं वो यज्ञ ऋभवोऽकारि यमा मनुष्वत्प्रदिवो दधिध्वे ।

4.034.03c प्र वोऽच्छा जुजुषाणासो अस्थुरभूत विश्वे अग्रियोत वाजाः ॥

4.034.04a अभूदु वो विधते रत्नधेयमिदा नरो दाशुषे मर्त्याय ।

4.034.04c पिबत वाजा ऋभवो ददे वो महि तृतीयं सवनं मदाय ॥

4.034.05a आ वाजा यातोप न ऋभुक्षा महो नरो द्रविणसो गृणानाः ।

4.034.05c आ वः पीतयोऽभिपित्वे अह्नामिमा अस्तं नवस्व इव ग्मन् ॥

4.034.06a आ नपातः शवसो यातनोपेमं यज्ञं नमसा हूयमानाः ।

4.034.06c सजोषसः सूरयो यस्य च स्थ मध्वः पात रत्नधा इन्द्रवन्तः ॥

4.034.07a सजोषा इन्द्र वरुणेन सोमं सजोषाः पाहि गिर्वणो मरुद्भिः ।

4.034.07c अग्रेपाभिर्ऋतुपाभिः सजोषा ग्नास्पत्नीभी रत्नधाभिः सजोषाः ॥

4.034.08a सजोषस आदित्यैर्मादयध्वं सजोषस ऋभवः पर्वतेभिः ।

4.034.08c सजोषसो दैव्येना सवित्रा सजोषसः सिन्धुभी रत्नधेभिः ॥

4.034.09a ये अश्विना ये पितरा य ऊती धेनुं ततक्षुरृभवो ये अश्वा ।

4.034.09c ये अंसत्रा य ऋधग्रोदसी ये विभ्वो नरः स्वपत्यानि चक्रुः ॥

4.034.10a ये गोमन्तं वाजवन्तं सुवीरं रयिं धत्थ वसुमन्तं पुरुक्षुम् ।

4.034.10c ते अग्रेपा ऋभवो मन्दसाना अस्मे धत्त ये च रातिं गृणन्ति ॥

4.034.11a नापाभूत न वोऽतीतृषामानिःशस्ता ऋभवो यज्ञे अस्मिन् ।

4.034.11c समिन्द्रेण मदथ सं मरुद्भिः सं राजभी रत्नधेयाय देवाः ॥

4.035.01a इहोप यात शवसो नपातः सौधन्वना ऋभवो माप भूत ।

4.035.01c अस्मिन्हि वः सवने रत्नधेयं गमन्त्विन्द्रमनु वो मदासः ॥

4.035.02a आगन्नृभूणामिह रत्नधेयमभूत्सोमस्य सुषुतस्य पीतिः ।

4.035.02c सुकृत्यया यत्स्वपस्यया चँ एकं विचक्र चमसं चतुर्धा ॥

4.035.03a व्यकृणोत चमसं चतुर्धा सखे वि शिक्षेत्यब्रवीत ।

4.035.03c अथैत वाजा अमृतस्य पन्थां गणं देवानामृभवः सुहस्ताः ॥

4.035.04a किम्मयः स्विच्चमस एष आस यं काव्येन चतुरो विचक्र ।

4.035.04c अथा सुनुध्वं सवनं मदाय पात ऋभवो मधुनः सोम्यस्य ॥

4.035.05a शच्याकर्त पितरा युवाना शच्याकर्त चमसं देवपानम् ।

4.035.05c शच्या हरी धनुतरावतष्टेन्द्रवाहावृभवो वाजरत्नाः ॥

4.035.06a यो वः सुनोत्यभिपित्वे अह्नां तीव्रं वाजासः सवनं मदाय ।

4.035.06c तस्मै रयिमृभवः सर्ववीरमा तक्षत वृषणो मन्दसानाः ॥

4.035.07a प्रातः सुतमपिबो हर्यश्व माध्यंदिनं सवनं केवलं ते ।

4.035.07c समृभुभिः पिबस्व रत्नधेभिः सखीँर्याँ इन्द्र चकृषे सुकृत्या ॥

4.035.08a ये देवासो अभवता सुकृत्या श्येना इवेदधि दिवि निषेद ।

4.035.08c ते रत्नं धात शवसो नपातः सौधन्वना अभवतामृतासः ॥

4.035.09a यत्तृतीयं सवनं रत्नधेयमकृणुध्वं स्वपस्या सुहस्ताः ।

4.035.09c तदृभवः परिषिक्तं व एतत्सं मदेभिरिन्द्रियेभिः पिबध्वम् ॥

4.036.01a अनश्वो जातो अनभीशुरुक्थ्यो३ रथस्त्रिचक्रः परि वर्तते रजः ।

4.036.01c महत्तद्वो देव्यस्य प्रवाचनं द्यामृभवः पृथिवीं यच्च पुष्यथ ॥

4.036.02a रथं ये चक्रुः सुवृतं सुचेतसोऽविह्वरन्तं मनसस्परि ध्यया ।

4.036.02c ताँ ऊ न्वस्य सवनस्य पीतय आ वो वाजा ऋभवो वेदयामसि ॥

4.036.03a तद्वो वाजा ऋभवः सुप्रवाचनं देवेषु विभ्वो अभवन्महित्वनम् ।

4.036.03c जिव्री यत्सन्ता पितरा सनाजुरा पुनर्युवाना चरथाय तक्षथ ॥

4.036.04a एकं वि चक्र चमसं चतुर्वयं निश्चर्मणो गामरिणीत धीतिभिः ।

4.036.04c अथा देवेष्वमृतत्वमानश श्रुष्टी वाजा ऋभवस्तद्व उक्थ्यम् ॥

4.036.05a ऋभुतो रयिः प्रथमश्रवस्तमो वाजश्रुतासो यमजीजनन्नरः ।

4.036.05c विभ्वतष्टो विदथेषु प्रवाच्यो यं देवासोऽवथा स विचर्षणिः ॥

4.036.06a स वाज्यर्वा स ऋषिर्वचस्यया स शूरो अस्ता पृतनासु दुष्टरः ।

4.036.06c स रायस्पोषं स सुवीर्यं दधे यं वाजो विभ्वाँ ऋभवो यमाविषुः ॥

4.036.07a श्रेष्ठं वः पेशो अधि धायि दर्शतं स्तोमो वाजा ऋभवस्तं जुजुष्टन ।

4.036.07c धीरासो हि ष्ठा कवयो विपश्चितस्तान्व एना ब्रह्मणा वेदयामसि ॥

4.036.08a यूयमस्मभ्यं धिषणाभ्यस्परि विद्वांसो विश्वा नर्याणि भोजना ।

4.036.08c द्युमन्तं वाजं वृषशुष्ममुत्तममा नो रयिमृभवस्तक्षता वयः ॥

4.036.09a इह प्रजामिह रयिं रराणा इह श्रवो वीरवत्तक्षता नः ।

4.036.09c येन वयं चितयेमात्यन्यान्तं वाजं चित्रमृभवो ददा नः ॥

4.037.01a उप नो वाजा अध्वरमृभुक्षा देवा यात पथिभिर्देवयानैः ।

4.037.01c यथा यज्ञं मनुषो विक्ष्वा३सु दधिध्वे रण्वाः सुदिनेष्वह्नाम् ॥

4.037.02a ते वो हृदे मनसे सन्तु यज्ञा जुष्टासो अद्य घृतनिर्णिजो गुः ।

4.037.02c प्र वः सुतासो हरयन्त पूर्णाः क्रत्वे दक्षाय हर्षयन्त पीताः ॥

4.037.03a त्र्युदायं देवहितं यथा व स्तोमो वाजा ऋभुक्षणो ददे वः ।

4.037.03c जुह्वे मनुष्वदुपरासु विक्षु युष्मे सचा बृहद्दिवेषु सोमम् ॥

4.037.04a पीवोअश्वाः शुचद्रथा हि भूतायःशिप्रा वाजिनः सुनिष्काः ।

4.037.04c इन्द्रस्य सूनो शवसो नपातोऽनु वश्चेत्यग्रियं मदाय ॥

4.037.05a ऋभुमृभुक्षणो रयिं वाजे वाजिन्तमं युजम् ।

4.037.05c इन्द्रस्वन्तं हवामहे सदासातममश्विनम् ॥

4.037.06a सेदृभवो यमवथ यूयमिन्द्रश्च मर्त्यम् ।

4.037.06c स धीभिरस्तु सनिता मेधसाता सो अर्वता ॥

4.037.07a वि नो वाजा ऋभुक्षणः पथश्चितन यष्टवे ।

4.037.07c अस्मभ्यं सूरय स्तुता विश्वा आशास्तरीषणि ॥

4.037.08a तं नो वाजा ऋभुक्षण इन्द्र नासत्या रयिम् ।

4.037.08c समश्वं चर्षणिभ्य आ पुरु शस्त मघत्तये ॥

4.038.01a उतो हि वां दात्रा सन्ति पूर्वा या पूरुभ्यस्त्रसदस्युर्नितोशे ।

4.038.01c क्षेत्रासां ददथुरुर्वरासां घनं दस्युभ्यो अभिभूतिमुग्रम् ॥

4.038.02a उत वाजिनं पुरुनिष्षिध्वानं दधिक्रामु ददथुर्विश्वकृष्टिम् ।

4.038.02c ऋजिप्यं श्येनं प्रुषितप्सुमाशुं चर्कृत्यमर्यो नृपतिं न शूरम् ॥

4.038.03a यं सीमनु प्रवतेव द्रवन्तं विश्वः पूरुर्मदति हर्षमाणः ।

4.038.03c पड्भिर्गृध्यन्तं मेधयुं न शूरं रथतुरं वातमिव ध्रजन्तम् ॥

4.038.04a यः स्मारुन्धानो गध्या समत्सु सनुतरश्चरति गोषु गच्छन् ।

4.038.04c आविर्ऋजीको विदथा निचिक्यत्तिरो अरतिं पर्याप आयोः ॥

4.038.05a उत स्मैनं वस्त्रमथिं न तायुमनु क्रोशन्ति क्षितयो भरेषु ।

4.038.05c नीचायमानं जसुरिं न श्येनं श्रवश्चाच्छा पशुमच्च यूथम् ॥

4.038.06a उत स्मासु प्रथमः सरिष्यन्नि वेवेति श्रेणिभी रथानाम् ।

4.038.06c स्रजं कृण्वानो जन्यो न शुभ्वा रेणुं रेरिहत्किरणं ददश्वान् ॥

4.038.07a उत स्य वाजी सहुरिर्ऋतावा शुश्रूषमाणस्तन्वा समर्ये ।

4.038.07c तुरं यतीषु तुरयन्नृजिप्योऽधि भ्रुवोः किरते रेणुमृञ्जन् ॥

4.038.08a उत स्मास्य तन्यतोरिव द्योर्ऋघायतो अभियुजो भयन्ते ।

4.038.08c यदा सहस्रमभि षीमयोधीद्दुर्वर्तुः स्मा भवति भीम ऋञ्जन् ॥

4.038.09a उत स्मास्य पनयन्ति जना जूतिं कृष्टिप्रो अभिभूतिमाशोः ।

4.038.09c उतैनमाहुः समिथे वियन्तः परा दधिक्रा असरत्सहस्रैः ॥

4.038.10a आ दधिक्राः शवसा पञ्च कृष्टीः सूर्य इव ज्योतिषापस्ततान ।

4.038.10c सहस्रसाः शतसा वाज्यर्वा पृणक्तु मध्वा समिमा वचांसि ॥

4.039.01a आशुं दधिक्रां तमु नु ष्टवाम दिवस्पृथिव्या उत चर्किराम ।

4.039.01c उच्छन्तीर्मामुषसः सूदयन्त्वति विश्वानि दुरितानि पर्षन् ॥

4.039.02a महश्चर्कर्म्यर्वतः क्रतुप्रा दधिक्राव्णः पुरुवारस्य वृष्णः ।

4.039.02c यं पूरुभ्यो दीदिवांसं नाग्निं ददथुर्मित्रावरुणा ततुरिम् ॥

4.039.03a यो अश्वस्य दधिक्राव्णो अकारीत्समिद्धे अग्ना उषसो व्युष्टौ ।

4.039.03c अनागसं तमदितिः कृणोतु स मित्रेण वरुणेना सजोषाः ॥

4.039.04a दधिक्राव्ण इष ऊर्जो महो यदमन्महि मरुतां नाम भद्रम्।

4.039.04c स्वस्तये वरुणं मित्रमग्निं हवामह इन्द्रं वज्रबाहुम्॥

4.039.05a इन्द्रमिवेदुभये वि ह्वयन्त उदीराणा यज्ञमुपप्रयन्तः।

4.039.05c दधिक्रामु सूदनं मर्त्याय ददथुर्मित्रावरुणा नो अश्वम्॥

4.039.06a दधिक्राव्णो अकारिषं जिष्णोरश्वस्य वाजिनः।

4.039.06c सुरभि नो मुखा करत्प्र ण आयूंषि तारिषत्॥

4.040.01a दधिक्राव्ण इदु नु चर्किराम विश्वा इन्मामुषसः सूदयन्तु।

4.040.01c अपामग्नेरुषसः सूर्यस्य बृहस्पतेराङ्गिरसस्य जिष्णोः॥

4.040.02a सत्वा भरिषो गविषो दुवन्यसच्छ्रवस्यादिष उषसस्तुरण्यसत्।

4.040.02c सत्यो द्रवो द्रवरः पतंगरो दधिक्रावेषमूर्जं स्वर्जनत्॥

4.040.03a उत स्मास्य द्रवतस्तुरण्यतः पर्णं न वेरनु वाति प्रगर्धिनः।

4.040.03c श्येनस्येव ध्रजतो अङ्कसं परि दधिक्राव्णः सहोर्जा तरित्रतः॥

4.040.04a उत स्य वाजी क्षिपणिं तुरण्यति ग्रीवायां बद्धो अपिकक्ष आसनि।

4.040.04c क्रतुं दधिक्रा अनु संतवीत्वत्पथामङ्कांस्यन्वापनीफणत्॥

4.040.05a हंसः शुचिषद्वसुरन्तरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत्।

4.040.05c नृषद्वरसदृतसद्व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतम्॥

4.041.01a इन्द्रा को वां वरुणा सुम्नमाप स्तोमो हविष्माँ अमृतो न होता ।

4.041.01c यो वां हृदि क्रतुमाँ अस्मदुक्तः पस्पर्शदिन्द्रावरुणा नमस्वान् ॥

4.041.02a इन्द्रा ह यो वरुणा चक्र आपी देवौ मर्तः सख्याय प्रयस्वान् ।

4.041.02c स हन्ति वृत्रा समिथेषु शत्रूनवोभिर्वा महद्भिः स प्र शृण्वे ॥

4.041.03a इन्द्रा ह रत्नं वरुणा धेष्ठेत्था नृभ्यः शशमानेभ्यस्ता ।

4.041.03c यदी सखाया सख्याय सोमैः सुतेभिः सुप्रयसा मादयैते ॥

4.041.04a इन्द्रा युवं वरुणा दिद्युमस्मिन्नोजिष्ठमुग्रा नि वधिष्टं वज्रम् ।

4.041.04c यो नो दुरेवो वृकतिर्दभीतिस्तस्मिन्मिमाथामभिभूत्योजः ॥

4.041.05a इन्द्रा युवं वरुणा भूतमस्या धियः प्रेतारा वृषभेव धेनोः ।

4.041.05c सा नो दुहीयद्यवसेव गत्वी सहस्रधारा पयसा मही गौः ॥

4.041.06a तोके हिते तनय उर्वरासु सूरो दृशीके वृषणश्च पौंस्ये ।

4.041.06c इन्द्रा नो अत्र वरुणा स्यातामवोभिर्दस्मा परितक्म्यायाम् ॥

4.041.07a युवामिद्ध्यवसे पूर्व्याय परि प्रभूती गविषः स्वापी ।

4.041.07c वृणीमहे सख्याय प्रियाय शूरा मंहिष्ठा पितरेव शम्भू ॥

4.041.08a ता वां धियोऽवसे वाजयन्तीराजिं न जग्मुर्युवयूः सुदानू ।

4.041.08c श्रिये न गाव उप सोममस्थुरिन्द्रं गिरो वरुणं मे मनीषाः ॥

4.041.09a इमा इन्द्रं वरुणं मे मनीषा अग्मन्नुप द्रविणमिच्छमानाः ।

4.041.09c उपेमस्थुर्जोष्टार इव वस्वो रघ्वीरिव श्रवसो भिक्षमाणाः ॥

4.041.10a अश्व्यस्य त्मना रथ्यस्य पुष्टेर्नित्यस्य रायः पतयः स्याम ।

4.041.10c ता चक्राणा ऊतिभिर्नव्यसीभिरस्मत्रा रायो नियुतः सचन्ताम् ॥

4.041.11a आ नो बृहन्ता बृहतीभिरूती इन्द्र यातं वरुण वाजसातौ ।

4.041.11c यद्दिद्यवः पृतनासु प्रक्रीळान्तस्य वां स्याम सनितार आजेः ॥

4.042.01a मम द्विता राष्ट्रं क्षत्रियस्य विश्वायोर्विश्वे अमृता यथा नः ।

4.042.01c क्रतुं सचन्ते वरुणस्य देवा राजामि कृष्टेरुपमस्य वव्रेः ॥

4.042.02a अहं राजा वरुणो मह्यं तान्यसुर्याणि प्रथमा धारयन्त ।

4.042.02c क्रतुं सचन्ते वरुणस्य देवा राजामि कृष्टेरुपमस्य वव्रेः ॥

4.042.03a अहमिन्द्रो वरुणस्ते महित्वोर्वी गभीरे रजसी सुमेके ।

4.042.03c त्वष्टेव विश्वा भुवनानि विद्वान्समैरयं रोदसी धारयं च ॥

4.042.04a अहमपो अपिन्वमुक्षमाणा धारयं दिवं सदन ऋतस्य ।

4.042.04c ऋतेन पुत्रो अदितेर्ऋतावोत त्रिधातु प्रथयद्वि भूम ॥

4.042.05a मां नरः स्वश्वा वाजयन्तो मां वृताः समरणे हवन्ते ।

4.042.05c कृणोम्याजिं मघवाहमिन्द्र इयर्मि रेणुमभिभूत्योजाः ॥

4.042.06a अहं ता विश्वा चकरं नकिर्मा दैव्यं सहो वरते अप्रतीतम् ।

4.042.06c यन्मा सोमासो ममदन्यदुक्थोभे भयेते रजसी अपारे ॥

4.042.07a विदुष्टे विश्वा भुवनानि तस्य ता प्र ब्रवीषि वरुणाय वेधः ।

4.042.07c त्वं वृत्राणि शृण्विषे जघन्वान्त्वं वृताँ अरिणा इन्द्र सिन्धून् ॥

4.042.08a अस्माकमत्र पितरस्त आसन्सप्त ऋषयो दौर्गहे बध्यमाने ।

4.042.08c त आयजन्त त्रसदस्युमस्या इन्द्रं न वृत्रतुरमर्धदेवम् ॥

4.042.09a पुरुकुत्सानी हि वामदाशद्धव्येभिरिन्द्रावरुणा नमोभिः ।

4.042.09c अथा राजानं त्रसदस्युमस्या वृत्रहणं ददथुरर्धदेवम् ॥

4.042.10a राया वयं ससवांसो मदेम हव्येन देवा यवसेन गावः ।

4.042.10c तां धेनुमिन्द्रावरुणा युवं नो विश्वाहा धत्तमनपस्फुरन्तीम् ॥

4.043.01a क उ श्रवत्कतमो यज्ञियानां वन्दारु देवः कतमो जुषाते ।

4.043.01c कस्येमां देवीममृतेषु प्रेष्ठां हृदि श्रेषाम सुष्टुतिं सुहव्याम् ॥

4.043.02a को मृळाति कतम आगमिष्ठो देवानामु कतमः शम्भविष्ठः ।

4.043.02c रथं कमाहुर्द्रवदश्वमाशुं यं सूर्यस्य दुहितावृणीत ॥

4.043.03a मक्षू हि ष्मा गच्छथ ईवतो द्यूनिन्द्रो न शक्तिं परितक्म्यायाम् ।

4.043.03c दिव आजाता दिव्या सुपर्णा कया शचीनां भवथः शचिष्ठा ॥

4.043.04a का वां भूदुपमातिः कया न आश्विना गमथो हूयमाना ।

4.043.04c को वां महश्चित्त्यजसो अभीक उरुष्यतं माध्वी दस्रा न ऊती ॥

4.043.05a उरु वां रथः परि नक्षति द्यामा यत्समुद्रादभि वर्तते वाम् ।

4.043.05c मध्वा माध्वी मधु वां प्रुषायन्यत्सीं वां पृक्षो भुरजन्त पक्वाः ॥

4.043.06a सिन्धुर्ह वां रसया सिञ्चदश्वान्घृणा वयोऽरुषासः परि ग्मन् ।

4.043.06c तदू षु वामजिरं चेति यानं येन पती भवथः सूर्यायाः ॥

4.043.07a इहेह यद्वां समना पपृक्षे सेयमस्मे सुमतिर्वाजरत्ना ।

4.043.07c उरुष्यतं जरितारं युवं ह श्रितः कामो नासत्या युवद्रिक् ॥

4.044.01a तं वां रथं वयमद्या हुवेम पृथुज्रयमश्विना संगतिं गोः ।

4.044.01c यः सूर्यां वहति वन्धुरायुर्गिर्वाहसं पुरुतमं वसूयुम् ॥

4.044.02a युवं श्रियमश्विना देवता तां दिवो नपाता वनथः शचीभिः ।

4.044.02c युवोर्वपुरभि पृक्षः सचन्ते वहन्ति यत्ककुहासो रथे वाम् ॥

4.044.03a को वामद्या करते रातहव्य ऊतये वा सुतपेयाय वार्कैः ।

4.044.03c ऋतस्य वा वनुषे पूर्व्याय नमो येमानो अश्विना ववर्तत् ॥

4.044.04a हिरण्ययेन पुरुभू रथेनेमं यज्ञं नासत्योप यातम् ।

4.044.04c पिबाथ इन्मधुनः सोम्यस्य दधथो रत्नं विधते जनाय ॥

4.044.05a आ नो यातं दिवो अच्छा पृथिव्या हिरण्ययेन सुवृता रथेन ।

4.044.05c मा वामन्ये नि यमन्देवयन्तः सं यद्ददे नाभिः पूर्व्या वाम् ॥

4.044.06a नू नो रयिं पुरुवीरं बृहन्तं दस्रा मिमाथामुभयेष्वस्मे ।

4.044.06c नरो यद्वामश्विना स्तोममावन्सधस्तुतिमाजमीळ्हासो अग्मन् ॥

4.044.07a इहेह यद्वां समना पपृक्षे सेयमस्मे सुमतिर्वाजरत्ना ।

4.044.07c उरुष्यतं जरितारं युवं ह श्रितः कामो नासत्या युवद्रिक् ॥

4.045.01a एष स्य भानुरुदियर्ति युज्यते रथः परिज्मा दिवो अस्य सानवि ।

4.045.01c पृक्षासो अस्मिन्मिथुना अधि त्रयो दृतिस्तुरीयो मधुनो वि रप्शते ॥

4.045.02a उद्वां पृक्षासो मधुमन्त ईरते रथा अश्वास उषसो व्युष्टिषु ।

4.045.02c अपोर्णुवन्तस्तम आ परीवृतं स्व१र्ण शुक्रं तन्वन्त आ रजः ॥

4.045.03a मध्वः पिबतं मधुपेभिरासभिरुत प्रियं मधुने युञ्जाथां रथम् ।

4.045.03c आ वर्तनिं मधुना जिन्वथस्पथो दृतिं वहेथे मधुमन्तमश्विना ॥

4.045.04a हंसासो ये वां मधुमन्तो अस्रिधो हिरण्यपर्णा उहुव उषर्बुधः ।

4.045.04c उदप्रुतो मन्दिनो मन्दिनिस्पृशो मध्वो न मक्षः सवनानि गच्छथः ॥

4.045.05a स्वध्वरासो मधुमन्तो अग्नय उस्रा जरन्ते प्रति वस्तोरश्विना ।

4.045.05c यन्निक्तहस्तस्तरणिर्विचक्षणः सोमं सुषाव मधुमन्तमद्रिभिः ॥

4.045.06a आकेनिपासो अहभिर्दविध्वतः स्व१र्ण शुक्रं तन्वन्त आ रजः ।

4.045.06c सूरश्चिदश्वान्युयुजान ईयते विश्वाँ अनु स्वधया चेतथस्पथः ॥

4.045.07a प्र वामवोचमश्विना धियंधा रथः स्वश्वो अजरो यो अस्ति ।

4.045.07c येन सद्यः परि रजांसि याथो हविष्मन्तं तरणिं भोजमच्छ ॥

4.046.01a अग्रं पिबा मधूनां सुतं वायो दिविष्टिषु ।

4.046.01c त्वं हि पूर्वपा असि ॥

4.046.02a शतेना नो अभिष्टिभिर्नियुत्वाँ इन्द्रसारथिः ।

4.046.02c वायो सुतस्य तृम्पतम् ॥

4.046.03a आ वां सहस्रं हरय इन्द्रवायू अभि प्रयः ।

4.046.03c वहन्तु सोमपीतये ॥

4.046.04a रथं हिरण्यवन्धुरमिन्द्रवायू स्वध्वरम् ।

4.046.04c आ हि स्थाथो दिविस्पृशम् ॥

4.046.05a रथेन पृथुपाजसा दाश्वांसमुप गच्छतम् ।

4.046.05c इन्द्रवायू इहा गतम् ॥

4.046.06a इन्द्रवायू अयं सुतस्तं देवेभिः सजोषसा ।

4.046.06c पिबतं दाशुषो गृहे ॥

4.046.07a इह प्रयाणमस्तु वामिन्द्रवायू विमोचनम् ।

4.046.07c इह वां सोमपीतये ॥

4.047.01a वायो शुक्रो अयामि ते मध्वो अग्रं दिविष्टिषु ।

4.047.01c आ याहि सोमपीतये स्पार्हो देव नियुत्वता ॥

4.047.02a इन्द्रश्च वायवेषां सोमानां पीतिमर्हथः ।

4.047.02c युवां हि यन्तीन्दवो निम्नमापो न सध्र्यक् ॥

4.047.03a वायविन्द्रश्च शुष्मिणा सरथं शवसस्पती ।

4.047.03c नियुत्वन्ता न ऊतय आ यातं सोमपीतये ॥

4.047.04a या वां सन्ति पुरुस्पृहो नियुतो दाशुषे नरा ।

4.047.04c अस्मे ता यज्ञवाहसेन्द्रवायू नि यच्छतम् ॥

4.048.01a विहि होत्रा अवीता विपो न रायो अर्यः ।

4.048.01c वायवा चन्द्रेण रथेन याहि सुतस्य पीतये ॥

4.048.02a निर्युवाणो अशस्तीर्नियुत्वाँ इन्द्रसारथिः ।

4.048.02c वायवा चन्द्रेण रथेन याहि सुतस्य पीतये ॥

4.048.03a अनु कृष्णे वसुधिती येमाते विश्वपेशसा ।

4.048.03c वायवा चन्द्रेण रथेन याहि सुतस्य पीतये ॥

4.048.04a वहन्तु त्वा मनोयुजो युक्तासो नवतिर्नव ।

4.048.04c वायवा चन्द्रेण रथेन याहि सुतस्य पीतये ॥

4.048.05a वायो शतं हरीणां युवस्व पोष्याणाम् ।

4.048.05c उत वा ते सहस्रिणो रथ आ यातु पाजसा ॥

4.049.01a इदं वामास्ये हविः प्रियमिन्द्राबृहस्पती ।

4.049.01c उक्थं मदश्च शस्यते ॥

4.049.02a अयं वां परि षिच्यते सोम इन्द्राबृहस्पती ।

4.049.02c चारुर्मदाय पीतये ॥

4.049.03a आ न इन्द्राबृहस्पती गृहमिन्द्रश्च गच्छतम् ।

4.049.03c सोमपा सोमपीतये ॥

4.049.04a अस्मे इन्द्राबृहस्पती रयिं धत्तं शतग्विनम् ।

4.049.04c अश्वावन्तं सहस्रिणम् ॥

4.049.05a इन्द्राबृहस्पती वयं सुते गीर्भिर्हवामहे ।

4.049.05c अस्य सोमस्य पीतये ॥

4.049.06a सोममिन्द्राबृहस्पती पिबतं दाशुषो गृहे ।

4.049.06c मादयेथां तदोकसा ॥

4.050.01a यस्तस्तम्भ सहसा वि ज्मो अन्तान्बृहस्पतिस्त्रिषधस्थो रवेण ।

4.050.01c तं प्रत्नास ऋषयो दीध्यानाः पुरो विप्रा दधिरे मन्द्रजिह्वम् ॥

4.050.02a धुनेतयः सुप्रकेतं मदन्तो बृहस्पते अभि ये नस्ततस्रे ।

4.050.02c पृषन्तं सृप्रमदब्धमूर्वं बृहस्पते रक्षतादस्य योनिम् ॥

4.050.03a बृहस्पते या परमा परावदत आ त ऋतस्पृशो नि षेदुः ।

4.050.03c तुभ्यं खाता अवता अद्रिदुग्धा मध्व श्चोतन्त्यभितो विरप्शम् ॥

4.050.04a बृहस्पतिः प्रथमं जायमानो महो ज्योतिषः परमे व्योमन् ।

4.050.04c सप्तास्यस्तुविजातो रवेण वि सप्तरश्मिरधमत्तमांसि ॥

4.050.05a स सुष्टुभा स ऋक्वता गणेन वलं रुरोज फलिगं रवेण ।

4.050.05c बृहस्पतिरुस्रिया हव्यसूदः कनिक्रदद्वावशतीरुदाजत् ॥

4.050.06a एवा पित्रे विश्वदेवाय वृष्णे यज्ञैर्विधेम नमसा हविर्भिः ।

4.050.06c बृहस्पते सुप्रजा वीरवन्तो वयं स्याम पतयो रयीणाम् ॥

4.050.07a स इद्राजा प्रतिजन्यानि विश्वा शुष्मेण तस्थावभि वीर्येण ।

4.050.07c बृहस्पतिं यः सुभृतं बिभर्ति वल्गूयति वन्दते पूर्वभाजम् ॥

4.050.08a स इत्क्षेति सुधित ओकसि स्वे तस्मा इळा पिन्वते विश्वदानीम् ।

4.050.08c तस्मै विशः स्वयमेवा नमन्ते यस्मिन्ब्रह्मा राजनि पूर्व एति ॥

4.050.09a अप्रतीतो जयति सं धनानि प्रतिजन्यान्युत या सजन्या ।

4.050.09c अवस्यवे यो वरिवः कृणोति ब्रह्मणे राजा तमवन्ति देवाः ॥

4.050.10a इन्द्रश्च सोमं पिबतं बृहस्पतेऽस्मिन्यज्ञे मन्दसाना वृषण्वसू ।

4.050.10c आ वां विशन्त्विन्दवः स्वाभुवोऽस्मे रयिं सर्ववीरं नि यच्छतम् ॥

4.050.11a बृहस्पत इन्द्र वर्धतं नः सचा सा वां सुमतिर्भूत्वस्मे ।

4.050.11c अविष्टं धियो जिगृतं पुरंधीर्जजस्तमर्यो वनुषामरातीः ॥

4.051.01a इदमु त्यत्पुरुतमं पुरस्ताज्ज्योतिस्तमसो वयुनावदस्थात् ।

4.051.01c नूनं दिवो दुहितरो विभातीर्गातुं कृणवन्नुषसो जनाय ॥

4.051.02a अस्थुरु चित्रा उषसः पुरस्तान्मिता इव स्वरवोऽध्वरेषु ।

4.051.02c व्यू व्रजस्य तमसो द्वारोच्छन्तीरव्रञ्छुचयः पावकाः ॥

4.051.03a उच्छन्तीरद्य चितयन्त भोजान्राधोदेयायोषसो मघोनीः ।

4.051.03c अचित्रे अन्तः पणयः ससन्त्वबुध्यमानास्तमसो विमध्ये ॥

4.051.04a कुवित्स देवीः सनयो नवो वा यामो बभूयादुषसो वो अद्य ।

4.051.04c येना नवग्वे अङ्गिरे दशग्वे सप्तास्ये रेवती रेवदूष ॥

4.051.05a यूयं हि देवीरृतयुग्भिरश्वैः परिप्रयाथ भुवनानि सद्यः ।

4.051.05c प्रबोधयन्तीरुषसः ससन्तं द्विपाच्चतुष्पाच्चरथाय जीवम् ॥

4.051.06a क्व स्विदासां कतमा पुराणी यया विधाना विदधुरृभूणाम् ।

4.051.06c शुभं यच्छुभ्रा उषसश्चरन्ति न वि ज्ञायन्ते सदृशीरजुर्याः ॥

4.051.07a ता घा ता भद्रा उषसः पुरासुरभिष्टिद्युम्ना ऋतजातसत्याः ।

4.051.07c यास्वीजानः शशमान उक्थै स्तुवञ्छंसन्द्रविणं सद्य आप ॥

4.051.08a ता आ चरन्ति समना पुरस्तात्समानतः समना पप्रथानाः ।

4.051.08c ऋतस्य देवीः सदसो बुधाना गवां न सर्गा उषसो जरन्ते ॥

4.051.09a ता इन्न्वे३व समना समानीरमीतवर्णा उषसश्चरन्ति ।

4.051.09c गूहन्तीरभ्वमसितं रुशद्भिः शुक्रास्तनूभिः शुचयो रुचानाः ॥

4.051.10a रयिं दिवो दुहितरो विभातीः प्रजावन्तं यच्छतास्मासु देवीः ।

4.051.10c स्योनादा वः प्रतिबुध्यमानाः सुवीर्यस्य पतयः स्याम ॥

4.051.11a तद्वो दिवो दुहितरो विभातीरुप ब्रुव उषसो यज्ञकेतुः ।

4.051.11c वयं स्याम यशसो जनेषु तद्द्यौश्च धत्तां पृथिवी च देवी ॥

4.052.01a प्रति ष्या सूनरी जनी व्युच्छन्ती परि स्वसुः ।

4.052.01c दिवो अदर्शि दुहिता ॥

4.052.02a अश्वेव चित्रारुषी माता गवामृतावरी ।

4.052.02c सखाभूदश्विनोरुषाः ॥

4.052.03a उत सखास्यश्विनोरुत माता गवामसि ।

4.052.03c उतोषो वस्व ईशिषे ॥

4.052.04a यावयद्द्वेषसं त्वा चिकित्वित्सूनृतावरि ।

4.052.04c प्रति स्तोमैरभुत्स्महि ॥

4.052.05a प्रति भद्रा अदृक्षत गवां सर्गा न रश्मयः ।

4.052.05c ओषा अप्रा उरु ज्रयः ॥

4.052.06a आपप्रुषी विभावरि व्यावर्ज्योतिषा तमः ।

4.052.06c उषो अनु स्वधामव ॥

4.052.07a आ द्यां तनोषि रश्मिभिरान्तरिक्षमुरु प्रियम् ।

4.052.07c उषः शुक्रेण शोचिषा ॥

4.053.01a तद्देवस्य सवितुर्वार्यं महद्वृणीमहे असुरस्य प्रचेतसः ।

4.053.01c छर्दिर्येन दाशुषे यच्छति त्मना तन्नो महाँ उदयान्देवो अक्तुभिः ॥

4.053.02a दिवो धर्ता भुवनस्य प्रजापतिः पिशङ्गं द्रापिं प्रति मुञ्चते कविः ।

4.053.02c विचक्षणः प्रथयन्नापृणन्नुर्वजीजनत्सविता सुम्नमुक्थ्यम् ॥

4.053.03a आप्रा रजांसि दिव्यानि पार्थिवा श्लोकं देवः कृणुते स्वाय धर्मणे ।

4.053.03c प्र बाहू अस्राक्सविता सवीमनि निवेशयन्प्रसुवन्नक्तुभिर्जगत् ॥

4.053.04a अदाभ्यो भुवनानि प्रचाकशद्व्रतानि देवः सविताभि रक्षते ।

4.053.04c प्रास्राग्बाहू भुवनस्य प्रजाभ्यो धृतव्रतो महो अज्मस्य राजति ॥

4.053.05a त्रिरन्तरिक्षं सविता महित्वना त्री रजांसि परिभुस्त्रीणि रोचना ।

4.053.05c तिस्रो दिवः पृथिवीस्तिस्र इन्वति त्रिभिर्व्रतैरभि नो रक्षति त्मना ॥

4.053.06a बृहत्सुम्नः प्रसवीता निवेशनो जगत स्थातुरुभयस्य यो वशी ।

4.053.06c स नो देवः सविता शर्म यच्छत्वस्मे क्षयाय त्रिवरूथमंहसः ॥

4.053.07a आगन्देव ऋतुभिर्वर्धतु क्षयं दधातु नः सविता सुप्रजामिषम् ।

4.053.07c स नः क्षपाभिरहभिश्च जिन्वतु प्रजावन्तं रयिमस्मे समिन्वतु ॥

4.054.01a अभूद्देवः सविता वन्द्यो नु न इदानीमह्न उपवाच्यो नृभिः ।

4.054.01c वि यो रत्ना भजति मानवेभ्यः श्रेष्ठं नो अत्र द्रविणं यथा दधत् ॥

4.054.02a देवेभ्यो हि प्रथमं यज्ञियेभ्योऽमृतत्वं सुवसि भागमुत्तमम् ।

4.054.02c आदिद्दामानं सवितर्व्यूर्णुषेऽनूचीना जीविता मानुषेभ्यः ॥

4.054.03a अचित्ती यच्चकृमा दैव्ये जने दीनैर्दक्षैः प्रभूती पूरुषत्वता ।

4.054.03c देवेषु च सवितर्मानुषेषु च त्वं नो अत्र सुवतादनागसः ॥

4.054.04a न प्रमिये सवितुर्दैव्यस्य तद्यथा विश्वं भुवनं धारयिष्यति ।

4.054.04c यत्पृथिव्या वरिमन्ना स्वङ्गुरिर्वर्ष्मन्दिवः सुवति सत्यमस्य तत् ॥

4.054.05a इन्द्रज्येष्ठान्बृहद्भ्यः पर्वतेभ्यः क्षयाँ एभ्यः सुवसि पस्त्यावतः ।

4.054.05c यथायथा पतयन्तो वियेमिर एवैव तस्थुः सवितः सवाय ते ॥

4.054.06a ये ते त्रिरहन्सवितः सवासो दिवेदिवे सौभगमासुवन्ति ।

4.054.06c इन्द्रो द्यावापृथिवी सिन्धुरद्भिरादित्यैर्नो अदितिः शर्म यंसत् ॥

4.055.01a को वस्त्राता वसवः को वरूता द्यावाभूमी अदिते त्रासीथां नः ।

4.055.01c सहीयसो वरुण मित्र मर्तात्को वोऽध्वरे वरिवो धाति देवाः ॥

4.055.02a प्र ये धामानि पूर्व्याण्यर्चान्वि यदुच्छान्वियोतारो अमूराः ।

4.055.02c विधातारो वि ते दधुरजस्रा ऋतधीतयो रुरुचन्त दस्माः ॥

4.055.03a प्र पस्त्या३मदितिं सिन्धुमर्कैः स्वस्तिमीळे सख्याय देवीम् ।

4.055.03c उभे यथा नो अहनी निपात उषासानक्ता करतामदब्धे ॥

4.055.04a व्यर्यमा वरुणश्चेति पन्थामिषस्पतिः सुवितं गातुमग्निः ।

4.055.04c इन्द्राविष्णू नृवदु षु स्तवाना शर्म नो यन्तममवद्वरूथम् ॥

4.055.05a आ पर्वतस्य मरुतामवांसि देवस्य त्रातुरव्रि भगस्य ।

4.055.05c पात्पतिर्जन्यादंहसो नो मित्रो मित्रियादुत न उरुष्येत् ॥

4.055.06a नू रोदसी अहिना बुध्न्येन स्तुवीत देवी अप्येभिरिष्टैः ।

4.055.06c समुद्रं न संचरणे सनिष्यवो घर्मस्वरसो नद्यो३ अप व्रन् ॥

4.055.07a देवैर्नो देव्यदितिर्नि पातु देवस्त्राता त्रायतामप्रयुच्छन् ।

4.055.07c नहि मित्रस्य वरुणस्य धासिमर्हामसि प्रमियं सान्वग्नेः ॥

4.055.08a अग्निरीशे वसव्यस्याग्निर्महः सौभगस्य ।

4.055.08c तान्यस्मभ्यं रासते ॥

4.055.09a उषो मघोन्या वह सूनृते वार्या पुरु ।

4.055.09c अस्मभ्यं वाजिनीवति ॥

4.055.10a तत्सु नः सविता भगो वरुणो मित्रो अर्यमा ।

4.055.10c इन्द्रो नो राधसा गमत् ॥

4.056.01a मही द्यावापृथिवी इह ज्येष्ठे रुचा भवतां शुचयद्भिरर्कैः ।

4.056.01c यत्सीं वरिष्ठे बृहती विमिन्वन्रुवद्धोक्षा पप्रथानेभिरेवैः ॥

4.056.02a देवी देवेभिर्यजते यजत्रैरमिनती तस्थतुरुक्षमाणे ।

4.056.02c ऋतावरी अद्रुहा देवपुत्रे यज्ञस्य नेत्री शुचयद्भिरर्कैः ॥

4.056.03a स इत्स्वपा भुवनेष्वास य इमे द्यावापृथिवी जजान ।

4.056.03c उर्वी गभीरे रजसी सुमेके अवंशे धीरः शच्या समैरत् ॥

4.056.04a नू रोदसी बृहद्भिर्नो वरूथैः पत्नीवद्भिरिषयन्ती सजोषाः ।

4.056.04c उरूची विश्वे यजते नि पातं धिया स्याम रथ्यः सदासाः ॥

4.056.05a प्र वां महि द्यवी अभ्युपस्तुतिं भरामहे ।

4.056.05c शुची उप प्रशस्तये ॥

4.056.06a पुनाने तन्वा मिथः स्वेन दक्षेण राजथः ।

4.056.06c ऊह्याथे सनादृतम् ॥

4.056.07a मही मित्रस्य साधथस्तरन्ती पिप्रती ऋतम् ।

4.056.07c परि यज्ञं नि षेदथुः ॥

4.057.01a क्षेत्रस्य पतिना वयं हितेनेव जयामसि ।

4.057.01c गामश्वं पोषयित्न्वा स नो मृळातीदृशे ॥

4.057.02a क्षेत्रस्य पते मधुमन्तमूर्मिं धेनुरिव पयो अस्मासु धुक्ष्व ।

4.057.02c मधुश्चुतं घृतमिव सुपूतमृतस्य नः पतयो मृळयन्तु ॥

4.057.03a मधुमतीरोषधीर्द्याव आपो मधुमन्नो भवत्वन्तरिक्षम् ।

4.057.03c क्षेत्रस्य पतिर्मधुमान्नो अस्त्वरिष्यन्तो अन्वेनं चरेम ॥

4.057.04a शुनं वाहाः शुनं नरः शुनं कृषतु लाङ्गलम् ।

4.057.04c शुनं वरत्रा बध्यन्तां शुनमष्ट्रामुदिङ्गय ॥

4.057.05a शुनासीराविमां वाचं जुषेथां यद्दिवि चक्रथुः पयः ।

4.057.05c तेनेमामुप सिञ्चतम् ॥

4.057.06a अर्वाची सुभगे भव सीते वन्दामहे त्वा ।

4.057.06c यथा नः सुभगाससि यथा नः सुफलाससि ॥

4.057.07a इन्द्रः सीतां नि गृह्णातु तां पूषानु यच्छतु ।

4.057.07c सा नः पयस्वती दुहामुत्तरामुत्तरां समाम् ॥

4.057.08a शुनं नः फाला वि कृषन्तु भूमिं शुनं कीनाशा अभि यन्तु वाहैः ।

4.057.08c शुनं पर्जन्यो मधुना पयोभिः शुनासीरा शुनमस्मासु धत्तम् ॥

4.058.01a समुद्रादूर्मिर्मधुमाँ उदारदुपांशुना सममृतत्वमानट् ।

4.058.01c घृतस्य नाम गुह्यं यदस्ति जिह्वा देवानाममृतस्य नाभिः ॥

4.058.02a वयं नाम प्र ब्रवामा घृतस्यास्मिन्यज्ञे धारयामा नमोभिः ।

4.058.02c उप ब्रह्मा शृणवच्छस्यमानं चतुःशृङ्गोऽवमीद्गौर एतत् ॥

4.058.03a चत्वारि शृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य ।

4.058.03c त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्याँ आ विवेश ॥

4.058.04a त्रिधा हितं पणिभिर्गुह्यमानं गवि देवासो घृतमन्वविन्दन् ।

4.058.04c इन्द्र एकं सूर्य एकं जजान वेनादेकं स्वधया निष्टतक्षुः ॥

4.058.05a एता अर्षन्ति हृद्यात्समुद्राच्छतव्रजा रिपुणा नावचक्षे ।

4.058.05c घृतस्य धारा अभि चाकशीमि हिरण्ययो वेतसो मध्य आसाम् ॥

4.058.06a सम्यक्स्रवन्ति सरितो न धेना अन्तर्हृदा मनसा पूयमानाः ।

4.058.06c एते अर्षन्त्यूर्मयो घृतस्य मृगा इव क्षिपणोरीषमाणाः ॥

4.058.07a सिन्धोरिव प्राध्वने शूघनासो वातप्रमियः पतयन्ति यह्वाः ।

4.058.07c घृतस्य धारा अरुषो न वाजी काष्ठा भिन्दन्नूर्मिभिः पिन्वमानः ॥

4.058.08a अभि प्रवन्त समनेव योषाः कल्याण्य१ः स्मयमानासो अग्निम् ।

4.058.08c घृतस्य धाराः समिधो नसन्त ता जुषाणो हर्यति जातवेदाः ॥

4.058.09a कन्या इव वहतुमेतवा उ अञ्ज्यञ्जाना अभि चाकशीमि ।

4.058.09c यत्र सोमः सूयते यत्र यज्ञो घृतस्य धारा अभि तत्पवन्ते ॥

4.058.10a अभ्यर्षत सुष्टुतिं गव्यमाजिमस्मासु भद्रा द्रविणानि धत्त ।

4.058.10c इमं यज्ञं नयत देवता नो घृतस्य धारा मधुमत्पवन्ते ॥

4.058.11a धामन्ते विश्वं भुवनमधि श्रितमन्तः समुद्रे हृद्य१न्तरायुषि ।

4.058.11c अपामनीके समिथे य आभृतस्तमश्याम मधुमन्तं त ऊर्मिम् ॥

Notes by Detlef Eichler (detlefeichler@googlemail.com):

1. Please note that this PDF file is not for commercial use and released only for personal scholarly activity.

2. This Devanāgarī version of Rigveda is from an ITRANS file which I have created on the basis of The Aufrecht/van Nooten/Holland (Samhita) version of the Rigveda. (http://www.people.fas.harvard.edu/~witzel/onlineRV.htm)

3. The font used for the Rigveda text is Ancient Sanskrit 99. For the numbers of Maṇḍala, Sūkta, and Mantra at the beginning of each line (1.001.01a) the font Times New Roman is used.

4. Last updated: 19 May 2010